PRACYAVANI SANSKRIT TEXTS

Vol. XXXXI

DESA-DIPAM

(Lights of the Country)

(A Modern Sanskrit Drama on a Nationalistic Theme)



देश-दीपम्

By

Dr. (Mrs) Roma Chaudhuri, M. A. D. Phil (Oxford),
F. A. S. B.

Formerly, Principal, Lady Brabourne College,
Govt. of West Bengal, Calcutta,
Now, Vice-Chancellor, Ravindra Bharati University,
Calcutta,
and Founder-Secretary, "Pracyavani"
(Institute of Oriental Learning)

Calcutta

April, 1970

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Published By—Dr. Roma Chaudhuri
For
PRACYAVANI
(Institute of Oriental Learning)
3, Federation Street, Calcutta-9.

Available from the
PRACYAVANI
Address as above

SANSKRIT PUSTAK BHANDAR
38, Cornwallis Street, Calcutta-9.

DAS GUPTA & CO.
54/3, College Street, Calcutta-12.

CHOWKHAMBA SANSKRIT SERIES OFFICE
Banaras City.

MOTILAL BANARASI DAS
P. B. 75, Chowk, Banaras City
Or,
Jawaharnagar, New Dehli.

MUNSHIRAM MANOHARLAL
P B, 1165, Nai Sarak, Dehli-6.

Printed by—Dr. Roma Chaudhuri
3, Federation Street, Calcutta—9

Price Rs. 5 only.

Rexin : Rs. 7. only.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

BLESSINGS

"Desa-Dipam", with a most beautiful and appropriate name, is another enchanting Modern Sanskrit Drama from the facile pen of our beloved pupil and daughter Dr. Roma Chaudhuri, formerly, the beloved Principal of the celebrated Lady Brabourne College, Government of West Bengal, Calcutta, for many years, and now the equally beloved Vice-Chancellor of the equally celebrated Ravindra Bharati University of Calcutta. Dr. Roma Chaudhuri really needs no introduction from me, or, any one else. For, like the sun, she is known to all for her deep and wide scholarship, exhilarating literary abilities, enchanting oratory, and above all, simple, sweet and saintly personality, befitting a real philosopher. She has endeared herself specially to the student-community because of her sublime Guru-like qualities of the head and the heart, so rare, unfortunately, now-a-days.

But what we, humble lovers of Ancient Indian Culture and Civilisation, most appreciate in her, is her indomitable energy and courage, manifested in her very bold move to compose and stage very Modern Sanskrit Dramas, all over India, also outside. We also know that the great aim of her revered husband, the late lamented Dr. Jatindra Bimal Chaudhuri, the celebrated Orientalist, Poet and Dramatist, was to make Sanskrit a popular mass language. With this noble aim in view, he composed most beautifully, in quick succession, nearly 30 Modern Sanskrit Dramas of great value; and arranged for the staging of the same, all over India, and also outside, with great success. The "Pracyavani" (Institute of Oriental Learning), established by the learned couple in 1943 for the propagation and popularisation of Oriental Learning and Culture, with its different branches, like Research,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Publication, Propagation, Catuspathis, Drama and the like, is also doing very good work, continuously all these years, even after the sad and sudden demise of our beloved Dr. Jatindra Bimal, under the able guidance of equally efficient, equally dedicated, equally devoted Dr. Roma, a true "Sahadharmini", in the best sense of the term.

The present work is a bright gem of Literary production, of "purest ray serene". From every point of view, it is, indeed, a superb work of great creative value. The plot is an absolutely original one—so very rare in the field of Modern Sanskrit Dramas—as, the few Modern Sanskrit Dramas that have been composed are mostly on some well-known Pauranic or Historic themes, or lives of great men and women. But the present Modern Sanskrit Drama proves conclusively that even very modern thoughts and incidents can be easily and beautifully expressed in Sanskrit. The languase is at once very simple and easily intelligible, yet equally sweet, charming and dignified.

The numerous songs and verses in different metres are also of a very high calibre.

We have no doubt that Dr. Roma Chaudhuri, like her illustrious husband Dr. Jatindra Bimal, will soon occupy a central place in the field of Modern Sanskrit Literature, not only for her valuable research works, but also, and more so, for her original contributions of ever-lasting value. Our blessings and good wishes to her.

(Dr.) Satkari Mookerji
Formerly, Head of the Dept. and
Asutosh Professor of Sanskrit, Calcutta University,
and Director, Nalanda
Research Institute, Bihar.
April, 1970

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"देशदीप"-नाटकस्य श्लोकसूची

(अकारादिवर्णक्रमानुसारिणी)

श्लोकसंख्या	पत्रसंख्या	
[अ]		
अतो हि देश	२५	४६
अपत्यं हि पित्रो	२१	३२
अपश्चात्तापिनां	२५	४४
अमले देश	५४	४०
अमृत-विमर्दित	१०	१५
अम्भोबुद्बुदवत्	४३	६४
अस्त्युर्वरा वृष्टिभि	२५	४५
[आ]		
आत्मानमेषा	४५	६७
अन्ध्यरुजेन्धन	४१	५८
[ऋ]		
ऋणैः पञ्चभि	३०	५०
[क]		
कथं क्षमेते	११	१६
कल्याणकरा	१५	२३
किं प्रद्योतयितुं	३	१२
कुङ्कुम-कुसुम	१०	१४
कुञ्जे वसन्तागम	५०	७८
कोटीसूर्यशोभा	५	८
कोमलकान्तिः	५७	९०
[ख]		
खर-रविकर	४३	६३
[च]		
चलामश्चलामो	४७	६९
चलामश्चलामो	४७	७२
चिरविरहाकुल	४२	६०
[ज]		
जड़-कुटिल	२	२
जननी शरणीं	५	७
जय जगदीश्वर	४१	५७
जीवो न दीनो	१२	१९
[त]		
तथापि सोऽशेष	३३	५३
[द]		
दीपप्रभेव	४	४
दीपरश्मिरिवै०	४	५
देशदीपाश्चिर	२४	४१
देशाम्बिका	५६	८७
[ध]		
धन्यं भवेदजन	१९	३१
धरणी भरणी	५७	८९
(न)		
नन्दनकानन	९	१३
न पार्थिवो जात्वसि	५३	८२
नमामि स्वदेशं	१	१
नीचोच्चतोत्कर्ष	११	१७
नृपः सार्वभौमो	४५	६६
[प]		
पददलिततृणश्चेत्	२९	४९

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्लोकसंख्या		पत्रसंख्या
परेश-पितृ	३०	५१
परेशमङ्गले०	३३	५२
पित्रर्णेभ्यः पुन	२१	३५
पित्रोर्लब्धं	२१	३३
पुण्यावनी	१२	१८
पूजावेद्यां	२८	४७
प्रचण्ड-मध्याह्न	५०	७७
प्रतितृणगुच्छं	१२	२०
प्रदाय दीप	२५	४३
प्रवह पवन	२४	३७
प्रीतिः प्राण	६	१०
प्रीतेः शिखा	६	११
[भ]		
भवत्यसत्यादपि	२	३
भव दहन	२३	३६
भारतभूतल	५३	८३
[म]		
मङ्गलनिर्झरिणी	४३	७०
मञ्जु मध्युप	४८	७६
मधुर-मोह	४०	५५
मम प्राणसमा	१०	२१
महावलधरो	४२	६१
माता गुरूणां	१६	२५
मानं रक्षन्	५६	८८
मेघः पुष्टो	२१	३४
[य]		
यथेन्द्रचापी	४३	६५
(र)		
रवेरिवास्तो	५१	८०

श्लोकसंख्या		पत्रसंख्या
[व]		
वहति ननु	५४	८६
विकच-कुसुम	५	९
विकशति नव	५४	८५
विजयविशोभिता	४७	७१
विलसति मम	४८	७५
विलोक्य तीर्थानि	१६	२६
विशति सादरा	४	६
विश्वशिक्षिका	१५	२२
वीरसुतदर्पितां	४१	५६
वेदभङ्गृत-कानन	४८	७४
[श]		
शोकभञ्जिनी	१५	२४
श्रद्धादत्तं काष्ठ	२८	४८
श्रुत्वा हरेर्नाम	१६	२७
श्रेष्ठं व्रतं	१९	३०
[स]		
संसारसिन्धो	४६	६८
सत्य-शिव-सुन्दर	२४	४२
सरोरुहस्येव	५१	८१
सर्वोपरिष्टात्	२४	३८
सहस्रकृत्वो	१६	२९
सहस्रपत्रं	५१	७९
सहस्रवारं	१६	२८
सुन्दरी मम देश	४८	७३
स्नेहनिर्झरी	४२	६२
[ह]		
हिमाचल-शुभ	४०	५४
हिमाचलसम	२४	३९
हे दिवसेश्वर	४२	५९
होमधूमर्जनि	५३	८४

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

(समाप्ता श्लोकसूची)

"देशदीप" नाटकस्य छन्दःसूची

छन्दः श्लोकसंख्या—

अनुष्टुप्—४-५,१०,४३-४४,४६, ५०-५१ ।
इन्द्रवंशा—२५ ।
इन्द्रवज्रा—६७ ।
उपजातिः—११,१६-१९,२७-३१,३८,४५, ६८, ७७-७८,८०-८२ ।
उपेन्द्रवज्रा—२६,७९ ।
पज्झटिका—२० ।
पञ्चचामरम्—५१ ।
भुजङ्गप्रयातम्—६६ ।
मन्दाक्रान्ता—३४-३५ ।
मात्रा—१,६,९,१३-२५,२१-२४, ३९-४२, ५४-६२,६९-७६,८३-८४, ८९-९० ।
मालिनी—२,३६-३७,४९,६३,८५-८६ ।
वंशस्थविलम्—६,५३,६५ ।
वसन्ततिलकम्—८७ ।
शशिवदना—३३ ।
शार्दूलविक्रीड़ितम्—१२,६४ ।
शालिनी—३३,४७-४८,८८ ।

(समाप्ता छन्दःसूची) ।

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"देश-दीपम्"

[रमा-विरचितम्]

(नान्दी)

नमामि स्वदेशं धरातोषकं
पीयूषागारं जराशोषकम् ।
विश्वप्रीति-शान्ति-पुण्यपोषकं
साम्य-मैत्री-मन्त्र-धन्यघोषकम् ॥१॥

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः—अहो ! अकस्मात् घोर-घनान्धकारेण समाच्छन्नं जातं जगतो भाग्यगगनम् ! अस्य कराल-कुटिल-कृष्णच्छाया अस्माकं सदा हास्यमञ्जुलां नित्यालोकोज्ज्वलां, शाश्वतलीलाचञ्चलां देशजननीमपि व्याकुलीकृतवती । अहो कष्टम् ! अहो दौर्भाग्यम् ! अहो अमङ्गलम् ! किं कुर्मः वयं मन्दभाग्याः ? विशेषतः, अस्याकं "प्राच्यवाणी"-सदस्यानां कर्णधारोऽपि नास्ति अस्मिन् दुःसमये । नाविकवीताः पोता इव अकूल-संसारसागरे भासमाना वयमद्य सहायसम्बलविहीनाः । किं कुर्मः दीना वयम् ? भवतु, आह्वयामि मम शाश्वतशान्तिस्थापिकां प्रज्ञा-प्रदीप्तां, शक्ति-समुन्नतां नटीम् ।

देवि ! यदि तव कार्यं सर्वमवसितं, तत् त्वरितमत्रागम्यतां सानुग्रहम् ।

(नटी प्रविशति)

नटी—आर्य ! इयमहमागतास्मि । किन्तु, भद्र ! अनुग्रहस्य का कथा ? भवतः सेवा मया अवश्यमेव करणीया सर्वदा सर्वथा च । को भवत आदेशः ?

सूत्रधारः—न आदेशः, अनुरोधः केवलम् । देवि ! कृपया वद किमहं करोमि अस्मिन् विशेष-पवित्र-दिने ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नटी—पूजाम्, केवलं पूजाम्। अद्य वयमत्र समागताः अस्माकं प्राणप्रतिमस्य आधुनिक-कविश्रेष्ठस्य विद्वदग्रगण्यस्य डक्टर-यतीन्द्रविमल-चतुर्धुरीणस्य परमशुभ-जन्मोत्सवमुपलक्ष्य। तस्य पूजा एव अद्य अस्माभिः करणीया। कथं भवान् अकारणमुद्विग्नो जातः।

सूत्रधारः—न अकारणम्। जानासि किल यत् वयम् अकस्मात् आक्रान्ता भीषण-शत्रुभिः। ततः न जानाति कोऽपि कदा किं भविष्यति।

नटी—(विहस्य) अहं जाने।

सूत्रधारः—त्वम्? किं त्वं जानासि?

नटी—(विहस्य)-श्रूयताम्—सत्यम् असत्यात्, न्यायः अन्यायात्, धर्मः अधर्मात्, मङ्गलम् अमङ्गलात् सहस्रकोटिशो बलवत्तरम्, सहस्रकोटिशो नित्य-तरम्, सहस्रकोटिशः पवित्रतरम्। ततः कः शोकः, का शङ्का, किं वा सङ्कटम्? किञ्च—

जड-कुटिल-कराल-श्याम-कान्ति-क्षपान्ते
तपन-किरण-तप्तं वासरं सौम्यमेति।
खर-रविकर-दग्धादुष्मणोऽन्ते सुशीता
जलधर-जलधौता प्रावृडायाति रम्या।
हृत-दल-कुसुमानां शीतदग्ध-द्रुमाणां
भवति नव-वसन्ते पत्र-पुष्पोपपत्तिः ॥२॥
भवत्यसत्यादपि सत्यसम्भवः
शिवोद्भवश्चाप्यशिवात् प्रजायते।
असुन्दराद् विन्दति जन्म सुन्दरं
सनातनोऽयं नियमो निरत्ययः ॥३॥ (युग्मकम्)

भद्र! अत एव चिन्तां त्यक्त्वा सज्जीभवतु भवान् अस्मिन् शुभदिने विशेषमङ्गलानुष्ठानार्थम्।

सूत्रधारः—(सानन्दम्) सत्यं सत्यम् पूर्ण-सत्यम्। अशेषबलदायिनी त्वम्, असीमकल्याणरूपिणी च।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदिदानीं अस्मिन् शुभजन्मोत्सवे केनचन समयोपयोगिना नाटकेन समागतानां सुधीजनानाम् आराधनमेव अस्माकं करणीयम्।

अथच, कविश्रेष्ठ-डक्टर-यतीन्द्रविमल-रचितानि यानि देशात्मबोधकानि नाटकानि सन्ति, तानि परम्परया वीरचरितान्यपि न साक्षात् रणदुर्मद-सैनिक-चरितानि। अपेक्ष्यते च सामाजिकैरद्यत्वे तादृशमेव नाटकमिति भृशं चिन्तितोऽस्मि।

नटी। अलं चिन्तनेन। नव-नाटकानाम् उद्भवे का बाधा?

सूत्रधारः। किमुच्यते का बाधेति? महत्येव बाधा विद्यते। देवि! न स्मरसि किल यत् नवनाटकस्रष्टा परम-वरेण्यः कविवरः डक्टर-यतीन्द्रविमलः परमजनन्याः सादराह्वानेन तस्याः परमपवित्र-सारस्वतसभायाः केन्द्रस्थले मातृगाथा-गीतिकाररूपेण विराजते सगौरवं साम्प्रतम्। ततः कुतो वयं प्राप्स्यामो देशात्मबोधकं नव-नाटकम्?

नटी। जानाति किल भवान् यत् यतिश्रेष्ठस्य विमल-जीवनस्य डक्टर-यतीन्द्रविमलस्य साधनाधारा न कदापि शुष्का भवितुमर्हति। परन्तु सा राजते राजिष्यते च अम्लानं चिरकालं यतीन्द्रविमलजीवनसर्वस्वाया यतीन्द्र-विमलैकप्राणायाः डक्टर-रमायाः जीवने। पतिदेवपथानुगामिनी सा हि अस्माकं नवनाटकरचयित्री।

सूत्रधारः। (सानन्दम्) सत्यम्, सत्यम्? ततः ब्रूहि श्रद्धेय-डक्टर-रमया रचितं किंनामधेयं देशात्मत्वबोधकं नवनाटकम् अस्माभिः अस्यां शुभसन्ध्यायाम् विज्ञजनसम्मुखे अभिनेतव्यम्?

नटी। "देश-दीप"—नामधेयं देशजननी-गौरवसूचकं, देशसेवामूलकं अभिनवं नाटकं तया सद्य एव विरचितम्। पुनः, भवन्तं विस्मापयितुं अजानत एव भवतो नाट्यनिपुणा नटयाः तस्य नाटकस्य शिक्षां मया ग्राहिताः।

सूत्रधारः। "देश-दीपम्" सुन्दरतमं नाम एतत्, मधुरतमं योग्यतमञ्च। "देश-दीपम्", देशसेवका देशस्य दीपा इति सुनिश्चितमेव। दुर्योग-तमिस्रायां ते एव सर्वेषाम् अनिर्वाणाः आलोकरश्मयः। तेषां चरितमूलकं नाटकमेतत्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

निश्चितमेव सर्वजनमनोहारि भविष्यति। ततः, देवि! न विलम्बः करणीयः, नाटकमिदं प्रारभ्यताम्। पश्यतु देवी

दीपप्रभेव दिग्वर्ति-वस्तूनि देशरक्षिणाम्।
उत्साहः सकलाल्लोँकानुद्भासयति सर्वथा ॥४॥
दीपरश्मिरिवैतेषां व्याप्याशेष-दिशो यशः।
स्वयं क्षित्वाऽपि कुरुते परेषां हितमन्वहम्।
देशदीपास्ततश्चैते ध्रुवं नास्त्यत्र संशयः ॥५॥ (युग्मकम्)

नटी। आर्य! विलम्बस्य का कथा? (अग्रे निर्दिश्य) पश्यतु, भवान् कृपया पश्यतु।

सूत्रधारः। (दृष्ट्वा) (सानन्दम्)—अहो!

विशति सादरा स्नेहसुमधुरा
जननी सुधारूपिणी
दशदीप-करा शुभ-शङ्खधरा
सन्तान-शमसाधिनी ॥६॥

(इति प्रस्तावना)

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

देश-दीपम्

प्रथम-दृश्यम्

[सुखी ग्राम्य-परिवारः]

स्थानम्—पल्ली-भवनम्।

समयः—सन्ध्या।

(ततः प्रविशति दशदीप-करा शुभ-शङ्खधरा जननी आराधना देवी, पूजारता)

[परमजननी-वन्दना]

जननी शरणी भुवनादरिणी
भवन-भरण-कारिणी
नमामि चरणे त्रितापतारिणि
मलिन-मरण-हारिणि ॥७॥
कोटी-सूर्य- शोभासारिणी
कोटी-चन्द्र- भारिणी।
कोटी-तारक- किरणधारिणी
कोटी-ग्रहविचारिणी ॥ ८॥
विकच-कुसुम-विमल-वरहासिनी
विगत-मल-कनक-किरणकाशिनी।
मलय-हत-मरकत-वनवासिनी
मरणजयि-मधुर-नदी-लासिनी ॥९॥

आराधना। जगन्मातः! प्रणमामि तव श्रीचरणारविन्दे सहस्रकोटिशः। वयं तुच्छातितुच्छाः पल्लीवासिन्यः, नास्माकं सन्ति कणयाऽपि धन-जन-मानाः, लेशेनापि ज्ञान-भक्ति-शक्तयः, लवेनापि ऋद्धि-वृद्धि-सिद्धयश्च। किन्तु अस्ति केवलम् एका सम्पत्—अनन्ता असीमा अमला प्रीतिः। भक्तिः साधनार्हा, भक्तिस्तुदुर्ध्यापा, भक्तिः खल्पजनवद्धा। प्रीतिस्त साधन-निरपेक्षा प्रीतिस्तु

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुलभा, प्रीतिस्तु सार्व-जनीना। अत एव प्रीतिरेव अस्माकं परमसम्पत्।

प्रीतिः प्राण-प्रदीपस्य समुज्ज्वलतमा शिखा।
अत्युदात्तो मनोवीणा-झङ्कार-मधुरस्वरः।
जीवनाख्य-सरोजस्य मधु मिष्टतमं हितम्॥१०॥
प्रीतेः शिखाऽज्ञान-तमोऽपहन्ति
झङ्कारशब्दो मनसः कुवाणीम्।
हालाहलघ्नं मधु जीवनस्य
कुतोऽस्ति तस्यास्तुलना जगत्याम्॥११॥ (युग्मकम्)

तामेव प्रीतिं जननि! तव श्रीपादपद्मयोः समर्पयामि। मातः! मातः! गृहाण, गृहाण, गृहाण माम्—मम दीनातिदीनं जीवनम्, मम हीनातिहीनान् प्राणान्, मम क्षीणातिक्षीणं मनः (प्रणमति)।

(ततः प्रविशति गृहस्वामी ब्रह्मबलः पत्रमेकं गृहीत्वा)

ब्रह्मबलः। देवि! साक्षादाराधनारूपे आराधने! किं समाप्ता खलु तव आराधना? प्रयोजनीयः कश्चन विषयः साम्प्रतं त्वया सह आलोचनीयः?

आराधना। जानासि किल त्वं यत् आराधना कदापि न समाप्ता भवितुमर्हति। यावज्जीवनम्, तावत् प्रार्थनम्, यतः प्रार्थनैव नीरस-जीवनस्य एका रसधारा। भवतु, कं प्रयोजनीयं विषयं त्वं मां वदितुमिच्छसि?

ब्रह्मबलः। जानासि त्वं यत् अद्य रात्रौ अस्माकं प्राणप्रतिम-पुत्ररत्नं चम्पकवदनः प्रत्यावर्तिष्यते कलिकाता-नगरीतः। किन्तु अद्यैवाहं तस्य पत्रमेकं प्राप्तवान् यत् तस्य सहपाठी अभिजातवंशीयः लक्षपतिसन्तानः अभ्रप्रतिमोऽपि तेन सह आगमिष्यति अत्र अद्यैव सन्ध्यायाम्। ततः किं कुर्मो वयम्?

आराधना। आर्य! अतिथिजनाः देवसमाः। ततः कथम् एतद्विषये तव विप्रतिपत्तिः?

ब्रह्मबलः। अस्माकम् एक-कक्षविशिष्टम् अतिक्षुद्रं मृत्कुटीरमिदम्। ततः कथं धनिजनयोग्यः समादरः अस्माभिः कर्तुं शक्येत?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

किं प्रद्योतयितुं शशाङ्कममलं शक्नोति खद्योतनः
किं वा तत् तृणपुष्पकं सुरभितां कर्तुं क्षमं पद्मिनीम्।
किं वोत्तुङ्गयितुं महीरुहवरं शक्तस्तृण-स्तम्बको
दीनः किं धनिमानिनां समुचितां सेवां विधातुं क्षमः ?॥१२॥

आराधना। धनिजनो भवतु वा न वा, स्व-योग्य-समादरः सर्वेषामेव करणीयः।

(दूरतः)

चम्पकवदनः—मातः ! मातः ! ममतामयि मातः ! पितः ! पितः ! परमश्रद्धेय पितः ! भगिनि ! भगिनि ! परमादरिणि भगिनि ! आगतोऽहम्। कुत्र यूयम् ? आगच्छत, आगच्छत त्वरितम्।

(ततः प्रविशतः चम्पकवदनः तस्य सखा अभ्रप्रतिमश्च)

चम्पकवदनः—मातापितरौ ! प्रणमामि। अयं मम प्राणप्रतिमः सखा अभ्रप्रतिमः।

अभ्रप्रतिमः—प्रणमामि भवन्तौ।

ब्रह्मबलः—कल्याणं वां भूयात्।

आराधना। परमजननी-कृपाधन्यौ भवतम्।

चम्पकवदनः। किन्तु कुत्र मम प्राणप्रतिमा भगिनी पङ्कजनयना ? किं सा मां विस्मृतवती, मयि कुपिता वा ?

आराधना। न, न। सा पठनार्थं विद्यालयं गता। शीघ्रम् आगमिष्यति सा।

चम्पकवदनः। रात्रौ पठनार्थं कुत्र सा गता ?

ब्रह्मबलः। बालिकानां स्वतन्त्र-विद्यालये। अहो, इत एव सा आगच्छति।

(ततः प्रविशति लीलाचञ्चला बालिका पङ्कजनयना)

पङ्कजनयना। (सानन्दम्) अहो ! भ्रातृवर ! आगतोऽसि ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चम्पकवदनः। अवश्यम्। पङ्कजनयने! अयं मम प्राणप्रियः सखा अभ्रप्रतिमः। अभ्र! इयं मम प्रियतमा भगिनी पङ्कजनयना।

अभ्रप्रतिमः। भद्रे! सश्रद्ध-नमस्कारः।

पङ्कजनयना। (सलज्जम्) सश्रद्ध-नमस्कारः, अतिथिवर!

चम्पकवदनः। (विहस्य) अभ्र! न सा एतादृश-सम्मानभाजनम् बालिकैव सा। ततः तां नाम्नैव आह्वय। तस्याः प्रकृतनाम विशालमेव— "प-ङ्क-ज-न-य-ना" इति। अत एव वयं तां "केलिः" इति क्षुद्रतरेण नाम्नैव आह्वयामः।

अभ्रप्रतिमः। "केलिः?" सुमिष्टतमं नामैतत्, योग्य-तमञ्च। सत्यमेव सा केलिस्वरूपा, लीलोच्छलिता।

ब्रह्मबलः। (विहस्य) अपेक्षस्व, वत्स, अपेक्षस्व। अतीव चञ्चला, छल-कलाकुशला मायाविनी इव सा। स्वल्पसमयेनैव त्वं तस्याः स्वरूपं ज्ञास्यसि। (सर्वे हसन्ति)।

पङ्कजनयना। (कपटरोषमाश्रित्य) पितृदेव! कथमकारणं त्वं मां निन्दसि? अतिथिमहोदय! मा विश्वसितु, मा विश्वसितु। अहं सातिशयं शान्ता शिष्टा विनीता। सर्वपदनता बालिका।

अभ्रप्रतिमः। (विहस्य) कालेनैव सर्वं ज्ञास्यामि।

आराधना। भवतु तत्। किन्तु, वत्स! मृत्कुटीरनिवासिनः वयं कथं तव सुखस्वाच्छन्द्यं विधातुं पारयामः? एक-कक्षविशिष्टम् अस्माकं मृत्कुटीरम्।

अभ्रप्रतिमः। नोद्विग्ना भवतु भवती। अहं चम्पकेन सह अस्मिन्नेव रम्ये शीतले अलिन्दे स्वप्स्यामि सानन्दम्। इदं मम ग्रामाञ्चले प्रथमागमनम्। ततः अहमत्र रोमाञ्चकराभिज्ञतां संग्रहीतुम् आग्रहशीलः। नगर्याम् अर्गलबद्ध-गृहाभ्यन्तरे सुखनिद्रा अस्माकम् अभ्यासः। किन्तु तत्र अभिनवत्वं रोमाञ्च-कारित्वञ्च कुत्र? ततः अत्र गहनवनमध्ये, मृत्कुटीरप्राङ्गणे, निर्मलनीलाकाशतले, अमलज्योत्स्नालिप्तः, मलयपवनसिक्तः, वेणुमर्मरसुप्तः अहं मम स्वप्नपुरीस्थित-माया-प्रासादं प्राप्स्यामि। अहो आनन्दः!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पङ्कजनयना। (सकौतुकम्) किन्तु कुत्र भवतः स्वप्नललना, मायाराजकन्या वा ?

चम्पकवदनः। (सकौतुकम्) प्राणप्रतिमे ! किं त्वमात्मानं स्वप्नललनां, मायाराजकन्यां वा मन्यसे ? ततो व्यर्था तव आशा।

(सर्वे हसन्ति)

पङ्कजनयना। (कपटरोषमाश्रित्य) भ्रातृवर ! न माम् अकारणं पर्याकुलां कुरु।

आराधना। यातु, यातु तत् ! वत्सौ ! आगच्छतं विश्रामार्थं भोजनार्थञ्च गृहाभ्यन्तरे। ततः परं यथेच्छं वाक्यालापं करिष्यथ।

चम्पकवदनः। यत् त्वम् आज्ञापयसि।

(सर्वे निष्क्रान्ताः)

—:०:—

द्वितीय-दृश्यम्

[देशसेवोपक्रमः]

स्थानम्—पल्ली-प्रान्तः।

समयः—ऊषा।

(ततः प्रविशति अभ्रप्रतिमः गायन्)

[पल्ली-वन्दना]

नन्दन-कानन-विम्बसमाना
चन्दन-वासित-निकुञ्ज-कमना।
मञ्जुल-नदी-मञ्जीर-रणना
राजति फुल्ला पल्ली-ललना ॥१३॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कुङ्कुम-कुसुम-कल्याण-हसना
पङ्कज-परीत-पल्वल-लसना
मन्थर-मलय-हिन्दोल-वसना
सुन्दर-नन्दित-कुन्दक-दशना ॥१४॥
अमृत-विमर्दित-मदान्धमरणा
पुञ्जित-पराग-रञ्जित-चरणा।
वञ्चित-जनगण-विधातृ-शरणा
शङ्कित-मानस-सङ्कटहरणा ॥१५॥

अभ्रप्रतिमः। अहो! आनन्दाप्लुतं मे मनः! रोमाञ्चितं मे सर्व-शरीरम्! पश्यामि, सविस्मयं पश्यामि, जीवनं सार्थकं कृत्वा पश्यामि पल्ली-जनन्याः सौवर्ण-सौन्दर्यं मौक्तिक-माधुर्यम्, ऐश्वरिकैश्वर्यञ्च! अदूरे दण्डायमानाः विश्वस्त-प्रहरिवत् उदारोत्तुङ्गा वृक्षराजयः। सबल-शाखावलीं विस्तार्य ते ऋषिप्रतिमाः पादपा भिक्षन्ते ईश्वराशिषं निरन्तरम्। ललित-पत्रगुच्छाः तामेव आशिषं स्नेहशीतलच्छायारूपेण पथिकजनेभ्यः वितरन्ति अनिवारम्। नर्तननिपुणा नदी च सफेन-तरङ्गभङ्गैः याति प्रियसमागमे। अतएव तस्याः हास्यं मधुरतमं, लास्यं मोहनतमं, दाक्षिण्यञ्च प्रशस्ततमम्।

अहो! आदितः अन्तं स्नेहपूतोऽयं ग्रामः।

(ततः प्रविशति वेगेन पङ्कजनयना—नृत्यन्ती, हसन्ती च)

पङ्कजनयना। (सकौतुकम्) अरे रे कविवर! ऊर्ध्वमुखो भूत्वा किं पश्यति भवान्? किं देवबाला एका आकाशपटे गाथामेकां लिखितवती भवदर्थम्?

अभ्रप्रतिमः। (साग्रहम्) देवबाला तु न आकाशे विराजते, परन्तु सा विराजते मत्सम्मुखे।

पङ्कजनयना। (सकौतुकम्) धिक्, धिक्! साधारण-पुरुष इव भवानपि दक्षश्चाटुकारः।

अभ्रप्रतिमः। नाहं चाटुकारः, इयमेव मम अन्तरस्य निगूढतमा मोहनतमा, मधुरतमा च वाणी!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पङ्कजनयना। (लज्जिता, नतमुखी—मुहूर्तेन प्रकृतिमापद्य) अहं देववाला चेत्, भवान् कः ?

अभ्रप्रतिमः। (सस्मितम्) अहं देववालायाः क्षुद्रातिक्षुद्रः पादरेणुरेव।

पङ्कजनयना। (सकौतुकम्) ततः भवान् मम आज्ञानुसारी सुनिश्चितमेव।

अभ्रप्रतिमः। (विहस्य) निःसन्देहम्! आज्ञापयतु भवती।

पङ्कजनयना। (सहसा गाम्भीर्यमवलम्ब्य) भद्र! अहं शिक्षा-दीक्षाविहीना पल्लीललना। भवत्सकाशे सन्ति मम जिज्ञास्याः विषया वहवः।

अभ्रप्रतिमः। कल्याणि! यथाशक्ति तव प्रश्नानामुत्तरदानाय यतिष्ये।

पङ्कजनयना। मां कथयतु कृपया भवान् देशस्य कथाम्।

अभ्रप्रतिमः। देशस्य कथाम्? प्राचीनां नवीनां वा?

पङ्कजनयना। उभे एव।

अभ्रप्रतिमः। भारतवर्षस्य प्राचीना कथा एकैव—"सर्वं खल्विदं ब्रह्म"! जगति सर्वे एव ब्रह्म। ततः सर्वे समानाः एव—वस्तुषु वस्तुषु, मनुष्येषु मनुष्येषु भेदा न सन्ति।

पङ्कजनयना। रोमाञ्चकारिणी इयं वाणी! ततः धनिश्रेष्ठः मानिश्रेष्ठः ज्ञानिश्रेष्ठः भवान, दरिद्रतमा दीनतमा अज्ञतमा अहञ्च समानौ एव? न, न, नैतद् युज्यते—

कथं क्षमेते समतां समेतुं
तृण-द्रुमौ, भास्कर-विस्फुलिङ्गौ।
खद्योत-ताराधिपती, सरोज-
वनप्रसूने, वत विन्दु-सिन्धू ॥१६॥
नीचोच्चतोत्कर्ष-निकर्षभेदो
वर्वर्ति सर्वत्र यतो जगत्याम्।
ततः कथं स्याव समौ कथञ्चित्
अहं निहीना सुमहान् भवांश्च ॥१७॥ (युग्मकम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अभ्रप्रतिमः। (विहस्य) सत्यमेव, अपरिसीमः खलु तव विनयः। यथा तथा वा भवतु, अहं त्वञ्च अभिन्नौ समानौ च सुनिश्चितम्।

पुण्यावनी-भारतवर्षजन्मनाम्
अनन्य-चारित्र-सुधन्य-जीविनाम्।
वाणी मुनीनामियमस्ति शाश्वती
ब्रह्माण्डतो ब्रह्म न भिद्यते क्वचित् ॥१८॥

जीवो न दीनो न लघुर्न हीनः
क्षीणो नवा ब्रह्म यतः स एव।
जगच्च शून्यं न जरं मरं वाऽ-
पूर्णं न वा ब्रह्म यतस्तदेव ॥१९॥ (युग्मकम्)

प्रतितृणगुच्छं प्रतिजलबिन्दु
प्रतिमहिचूर्णं प्रतिपरमाणु।
विलसति सततं तदीयमतुलं
महदैश्वर्यं गुरु माधुर्यम्।
स्वीकर्तव्यं तदिदं सर्वै-
र्ब्रह्म तदण्डं न पृथक् त्वेकम् ॥२०॥ (विशेषकम्)

पङ्कजनयना। (मुग्धा) वदतु भवान् मां देशस्य नवीनां कथाम्।

अभ्रप्रतिमः। देशस्य नवीना कथापि समाना एव—साम्यम्, एकत्वम्, अभिन्नत्वञ्च केवलम्।

पङ्कजनयना। अहो! अमृतवर्षिणी इयं कथा! धनि-दरिद्रयोः उच्च-नीचयोः पण्डित-मूर्खयोः, ब्राह्मण-शूद्रयोः, स्त्री-पुरुषयोः, योग्यायोग्ययोः न सन्ति कथञ्चिदपि भेदाः! कार्यतः तत्त्वमिदम् अनुसृतं चेत्, पृथिवी स्वर्गभूमिर्भवेत्।

अभ्रप्रतिमः। सौम्ये, पुण्यभूमि-भारतवर्षस्य पुण्यश्लोकऋषिवाक्यानुसारेण स्वर्ग-मर्त्ययोः भेदो नास्ति—ब्रह्म एव ब्रह्माण्डम्, ब्रह्माण्डमेव ब्रह्म।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पङ्कजनयना। (मुग्धा) अहो! रोमाञ्चितकलेवराहं जाता—ब्रह्म एव ब्रह्माण्डम्, ब्रह्माण्डमेव ब्रह्म! इतो महत्तरा मधुरतरा मोहनतरा च का वा अस्ति कथा?

आराधना। (नेपथ्ये)—वत्सौ! कुतो युवाम्? त्वरितमागच्छतम् भोजनार्थम्।

पङ्कजनयना। आगच्छावः, मातः, आगच्छावः।

(पटपरिवर्तनम्)

स्थानम्—मृत्कुटीरस्य अलिन्दः।

समयः—प्रभातम्।

(सर्वे समागताः)

आराधना। वत्स अभ्र! भोजनार्थं किमहं तुभ्यं दास्यामि? नारिकेल-खण्डमिश्रितं भर्जित-तण्डुलमात्रमेव मे सम्बलम्।

अभ्रप्रतिमः। (विहस्य) तदेव यथेष्टं मातः! तदेव सातिशयं पुष्टिकरम्; तदेव मह्यं भृशं रोचते च।

चम्पकवदनः। पितः! आकाशवाणी-घोषणा-श्रवणार्थं किं भवान् "चाचा"-रहिमस्य गृहं गतवान्?

ब्रह्मबलः। न, न, अहं तव बान्धवार्थं मत्स्यान्वेषणाय गतः।

अभ्रप्रतिमः। मत्स्यात् प्रयोजनीयतरा इयम् वार्ता! (सर्वे हसन्ति)।

पङ्कजनयना। अहो! इत एव आगच्छति "चाचा"-रहिमः।

सर्वे। श्रद्धेय-"चाचा"-रहिम! प्रणमामि।

रहिमः। वत्साः! कल्याणं वो भूयात्।

आराधना। पूजनीय ज्येष्ठभ्रातृवर! कृपया अस्माभिः सह भोजनं कुरु।

रहिमः। धन्यवादः। किन्तु स्नेहमयि भगिनि! भोजनं साम्प्रतं मह्यं न रोचते। देशमातुः सङ्कटकाले किम् अस्माभिः करणीयम्? तदेवेदानीं स्थिरीकर्तव्यम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ब्रह्मबलः। भ्रातृवर ! का वार्ता ?

रहिमः। गुरुतरा वार्ता ! आकाशवाण्या माध्यमेन अस्माकं जनप्रियः प्रधानमन्त्री अस्मान् आहूतवान् सर्वस्वत्यागाय। ग्राममध्ये इयं वार्ता प्रचारयितव्या।

चम्पकवदनः। (साग्रहम्)-ज्येष्ठतात-महोदय ! अत्र मम प्राणप्रियो बान्धवः अभ्रः समुपस्थितः, सः अस्माकं सुविख्यात-महाविद्यालयस्य श्रेष्ठः छात्रः गीतविशारदः, वाग्मी च। परेद्युः आह्वयतु भवान् ग्रामवासिनां महतीं सभामेकाम्। तत्रैव स देशजननीकथां वदिष्यति देशजननीस्तुतिं च करिष्यति सर्वेषाम् उत्साहवर्धनाय।

अभ्रप्रतिमः। न हि, न हि, अहम् अपरिणतबुद्धिश्छात्र एव। ततः प्राज्ञतरा जनाः तत्र उपदेशामृतं वर्षन्तु।

रहिमः। सुष्ठु अयं प्रस्तावः। अस्यां सभायां प्राचीन-नवीनाः, स्त्री-पुरुषाः, हिन्दु-मुसलमानाः सर्वे एव आगमिष्यन्ति, भाषिष्यन्ते च यथेच्छम्। भ्रातृवर ब्रह्मबल ! कृपया आगच्छ मया सह सर्वव्यवस्थादि-करणाय।

ब्रह्मबलः। यत् भवानादिशति। (सर्वे प्रस्थिताः)।

—०—

तृतीय-दृश्यम्

[देशसेवाह्वानम्]

स्थानम्—पल्ली-प्रान्तरे महती ग्रामसभा।

समयः—अपराह्णः।

(सर्वे समागताः)

अभ्रप्रतिमः— [देशवन्दना]

मम प्राणसमा रमणीय-रमा
देशजननी मोहिनी।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रणमामि त्वां विशाल-विमलां
गङ्गा-हिमागिरि-शोभिनि ॥२१॥
विश्व-शिक्षिका निःस्व-रक्षिका
शिष्य-पूर्ण-तपोवना ।
वेदवन्दिता मन्त्र-मन्द्रिता
मुनि-पादरेणु-रमणा ॥२२॥
कल्याणकरा कालुष्यहरा
साम्य-मैत्री-मधुघना ।
हृत-पराजया धृत-वराभया
महामातृ-सुधाधना ॥२३॥
शोकभञ्जिनी लोकरञ्जिनी
धरणी-प्राण-नन्दिनी ।
जलधि-शिञ्जिनी त्रिदिव-गञ्जिनी
पुण्यामृत-स्यन्दिनी ॥२४॥

रहिमः । मातरः ! भ्रातरश्च । अद्य वयमत्र समागताः देशस्य सङ्कटकाले अस्माकं कर्तव्यनिर्धारणाय । ततः प्राथम्येन अस्य ग्रामस्य अतिथिवरः नवागतः श्री-अभ्रप्रतिमः किञ्चित् वदिष्यति । तरुणोऽपि स कलिकाता-विश्वविद्यालस्य श्रेष्ठः छात्रः, नानागुणविमण्डितः ।

अभ्रप्रतिमः । (उत्थाय) समागत-गुरुजनेभ्यः सहस्र-कोटिशः प्रणामाञ्जलिः विज्ञापयामि । परमश्रद्धेय-"चाचा"-रहिमस्य वचनानुसारेण न भवद्भिर्मयि बहुमानः स्थापनीयः, यतोऽहं अतिसाधारणः दीनहीनश्छात्रः ।

तथापि, मन्ये, मातृपूजायां सर्वेषामधिकारः समान एव ! तत्र योग्यायोग्ययोर्भेदलेशोऽपि नास्ति । अत एव अयोग्योऽपि अहं भवतां समीपे दण्डायमानो भवितुम् उत्सहे ।

सर्वे । साधु, साधु, साधु ।

अभ्रप्रतिमः । प्राज्ञवराः ! भवन्तो जानन्ति किलयत् पुण्यो धन्य

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अनन्यः देशः "भारतवर्षम्" आ सृष्टेः मातृसाधकम् ; मातृपूजा एव भारतवर्षस्य चिरन्तनी एषणा, महती आराधना, शाश्वती साधना च ।

माता गुरूणां परमो गुरुर्मतः
सा दैवतानां परमञ्च दैवतम् ।
सर्वाश्रयाणां परमाश्रयोऽपि सा
तुल्यं जनन्या न ततोऽस्ति भूतले ॥२५॥
विलोक्य तीर्थानि सहस्रवारं
प्रजायते यत् फलमत्र लोके ।
फलं ततः कोटिगुणाधिकं स्यात्
सकृन्मुखालोकनतो जनन्याः ॥२६॥
श्रुत्वा हरेर्नाम सहस्रवारं
प्रजायते यत् फलमत्र लोके ।
फलं ततः कोटिगुणाधिकं स्या-
च्छ्रीनाम्न आकर्णनतो जनन्याः ॥२७॥
सहस्रवारं श्रुतिमन्त्रपाठात्
प्रजायते यत् फलमत्र लोके ।
फलं ततः कोटिगुणाधिकं स्या-
च्छ्रीनाम्न उच्चारणतो जनन्याः ॥२८॥
सहस्रकृत्वोऽमरविग्रहाङ्घ्रि-
स्पर्शेन यावत् फलमत्र लभ्यम् ।
फलं ततः कोटिगुणाधिकं स्या-
न्मातुः सकृच्छ्रीपदसंग्रहेण ॥२९॥

सर्वे । साधु साधु साधु !

अभ्रप्रतिमः । (भावाविष्टः) किन्तु का सा माता ? किं तस्याः स्वरूपम् ? अत्रैव अस्ति भारतवर्षस्य अपरूपम् अभिनवत्वम्, विशाल

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वैशिष्ट्यम्, शोभनं सार्वजनीनत्वञ्च। यतः, भारतवर्षं शाश्वतकालम् ऐक-भूमिः, साम्यक्षेत्रं मैत्रीस्थलञ्च। ततो भारतवर्षं सर्वदा मातृत्रयम् एकमातृरूपेण पूजयति—जगन्मातरं, गृहमातरं देशमातरञ्च। न एता भिन्नाः—एता एका एव। वस्तुतः एकैव जगन्माता गृहे सन्तानजननीरूपेण, बहिर्देशमातृ-रूपेण च प्रकाशिता। को भेदः? अत एव देशपूजैव मातृपूजा, देशपूजैव परमजननीपूजा, नान्या।

सर्वे। साधु, साधु, साधु! अपूर्वा खलु इयं वार्ता।

अभ्रप्रतिमः। (भावाविष्टः) न देशो जड़द्रव्यमात्रम्, न देशो मृत्तिका-प्रस्तरसमाहारमात्रम्, न देशः स्थानविशेषमात्रम्। परन्तु देशो जीवन्ती जाग्रती सत्ता, देशोऽस्माकं प्राण-मनो-जीवनस्वरूपः, देशः सर्वेषाम् लोकामृतभूतः। ततो देशसेवार्थम् अस्माभिः सर्वस्वानि दातव्यानि।

सर्वे। साधु, साधु, साधु!

(ततः उत्तिष्ठति धनी गर्वोद्धतः विपुलविक्रमः)।

विपुलविक्रमः। (गर्वितः) अरे रे तरुण-बालक! आन्तर्महाविद्यालय-वाग्मिता-प्रतियोगितायां त्वं प्रथमपुरस्कारयोग्यः, निःसन्देहम्। परन्तु तव उपदेशा बुद्बुदवद् बहिः सुन्दराः, अथच अन्तः सारशून्याः! हाः, हाः, हाः!

पङ्कजनयना। (सरोषम्) नायम् उपहासविषयः। कृपया कथयतु भवान् कथं श्रीअभ्रप्रतिमस्य भाषणम् अन्तःसारशून्यम्?

विपुलविक्रमः। (स्वगतम्) केयम् अत्याश्चर्या रूपवती ललना? मुनिजनमनोहारिणी, मनसिजजयिनी सा। भवतु, इमां तोषयामि।

(प्रकाशम्) भद्रे! मा रोषपरवशा भवतु भवती अकारणम्। अत्र इयमेव मम विप्रतिपत्तिः। यत् वयम् अस्माकं रक्षणावेक्षणार्थं सरकार-बाहादुराय प्रभूतानि धनानि दद्मः सर्वदा। करभारपिष्टा वयम्। ततः अस्माकं रक्षाभारः परिपूर्णतो जातीयसरकारबाहादुरस्य एव। कथं वयं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुनः सरकारवाहादुराय अर्थान् दास्यामः ? यदि अस्माभिरेव सङ्कटकाले देशरक्षा करणीया ततः किं वा प्रयोजनं जातीय-सरकारवाहादुरेण ?

चाटुकारः। अतीव युक्तियुक्ता प्राज्ञश्रेष्ठस्य श्रीविपुलविक्रमस्य इयं समालोचना।

सर्वे। धिक्, धिक्, धिक्!

पङ्कजनयना। भद्रमहोदय! को वा नाम जातीय-सरकार-वाहादुरः? स न मुष्टिमेयानां मन्त्रिमहोदयानां समाहारः। देशस्य प्रत्येकं नागरकाः नागरिक्यश्च जातीयसरकारभुक्ताः।

रहिमः। सत्यं, चिरसत्यम्।

पङ्कजनयना। पुनरपि, शान्तिकाले दत्ताः कराः न युद्धकाले सङ्कटसमये पर्याप्ताः। तदर्थम् अतिरिक्ता अर्था अस्माभिः अवश्यमेव देयाः।

विपुलविक्रमः। (स्वगतम्) मुग्धो जातोऽहम् अस्याः असीमसौन्दर्येण, अपूर्व-साहसिकत्वेन च। (प्रकाशम्) भद्रे! भवत्या मधुरवचनानि मां मुग्धीकुर्वन्ति, किन्तु, भवत्या युक्तयो न मम हृदयं स्पृशन्ति जयन्ति वा।

चाटुकारः। अपूर्वा खलु श्रीविपुलविक्रमस्य वाणी।

विपुलविक्रमः। पुनः, वयम् अहिंसा-पूजकाः चिरकालम्। ततो हिंसात्मक-संग्रामो नास्मासु शोभते।

पङ्कजनयना। किमाश्चर्यमतः परम्। वयमेव आक्रान्ता भीषणशत्रुभिः। ततस्ते शत्रवः अवश्यमेव अस्माभिः पराजेतव्याः।

रहिमः। किम् अस्याः सभाया मतम्?

करिमः। अहं करिम-नामा स्थपतिः श्रीमत्याः पङ्कजनयनाया मतं समर्थये।

रामः। अहं राम-नामा कृषकः। अहमपि श्रीमत्याः पङ्कजनयनाया मतं समर्थये।

फातेमा। अहं फातेमा-नाम्नी तन्तुवाय-रमणी। अहमपि अस्या मतं समर्थये।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरला। अहं सरला-नाम्नी कुम्भकारवनिता। अहमपि अस्या मतं समर्थये।

सर्वे। वयमपि समर्थयामहे, वयमपि वयमपि। जयो देशमातुर्जयः, जयो जातीयसरकारवाहादुरस्य जयः, जयो भारतवासिनां जयः।

रहिमः। मातरः! भ्रातरश्च! सज्जीभवन्तु भवन्तः सुदीर्घ-संग्रामार्थम्, प्रस्तुता भवन्तु भवन्तो देशजनन्याः श्रीचरणारविन्दे सर्वस्वसमर्पणाय। कुतः?

श्रेष्ठं व्रतं तत् खलु जीवनस्य
स्वदेश-मातुर्नियतार्चनं यत्।
आलोकरेखा फलमम्बु वायु-
र्यस्याः सदा रक्षति जीवनं नः ॥३०॥
धन्यं भवेदर्जनमर्पणेन
दानेन धन्यं ग्रहणं हि लोके।
यदर्जितं जीवनमद्य मातु-
र्देयं तदस्यै बहुमानपूर्वम् ॥३१॥

हिन्दु-मुसलमानाः, धनिदरिद्राः, पण्डितमूर्खाः, स्त्रीपुरुषाः, योग्यायोग्याः सर्वे भारत-सन्ताना मातृपूजावेदीतले समवेता भवन्तु। "खोदाताला" युष्मानं रक्षतु कृपया। (सर्वे प्रस्थिताः)

समाप्तं तृतीय-दृश्यम्

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चतुर्थ-दृश्यम्

[चम्पकवदनस्य युद्धगमनम्]

स्थानम्—पल्लीभवनम् ।

समयः—प्रभातम् ।

(ततः प्रविशन्ति चिन्ताकुलो ब्रह्मबलः, साश्रु-नेत्रा आराधना, दृढ़प्रतिज्ञश्चम्पकवदनः, शान्तवदनोऽभ्रप्रतिमः हास्योच्छलिता पङ्कजनयना च)

ब्रह्मबलः । प्राणप्रिय पुत्र चम्पकवदन ! किं त्वं तव सङ्कल्प-साधनाय दृढ़प्रतिज्ञः ? त्वया विना किं वा आवां शून्य-गृहे कुर्वः ?

आराधना । प्राणाधिक ! त्वम् आवयोरेकमात्र-पुत्रः । दुर्धर्ष-शत्रु-कृते अस्मिन् भीषणतमे संग्रामे त्वाम् अहं प्रेरयितुं न शक्नोमि, जीवनधन, न पारयामि कदाचन । वत्स ! मम जीवन-शतदलस्य एकमात्रं मधु त्वं त्वमेव । मम जीवन-समुद्रस्य एकमात्रं पोतस्त्वं त्वमेव । मम जीवनकारागारस्य एकमात्रं प्रदीपस्त्वं त्वमेव । मम जीवन-पथस्य एकमात्रं यष्टिस्त्वं त्वमेव । (रोदिति)

चम्पकवदनः । (नतजानुः) मातः ! मातः ! मातः ! ममता-मधुरे मातः ! मा रुदिहि, मा रुदिहि । तव एकापि अश्रुकणा माम् उत्तप्ताङ्गारवद् दहति । मातः ! मातः ! विरम, विरम ।

पङ्कजनयना । परम-स्नेह-कोमले मातः ! धैर्यं धारय, साहसमवलम्बस्व, अश्रूणि संवृणु । भ्रातृवरश्चम्पकवदनो यथा तव प्राणप्रियः पुत्रस्तथा जगन्मातुर्देशमातुश्चापि । मातृत्रयम् अभिन्नम्—इति श्रीअभ्रप्रतिमस्य वाणी सत्यतमा । ततो भ्रातृवरस्य यथा त्वदर्थं कर्तव्यानि सन्ति तथा सन्ति जगज्जनन्यर्थं देशजनन्यर्थञ्च । अप्येतत् सत्यं न वा ?

ब्रह्मबलः । पूर्णसत्यम् ।

पङ्कजनयना । अत एव देशजनन्याः सङ्कट-समये यदि तस्याः सन्ताना-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्तदर्थं न यतन्ते, ततो वद, का वा तस्या आशा, कुतो वा तस्या मुक्तिः, कथं वा तस्या जयः ?

आराधना। प्राणप्रतिम-कन्यके ! अखण्डनीयाः खलु तव युक्तयः। तथापि न मम मन इमाः स्वीकरोति।

पङ्कजनयना। कथं न ? मातः ! युक्तिरेव सर्वत्र वरणीया।

अपत्यं हि पित्रोर्भवत्येकमात्रम्।
सहायोऽथ शक्तिः सुहृत् सम्बलश्च ॥३२॥
पित्रोर्लब्धं जीवनं स्वं तदर्थं
मुञ्चन् पुत्रो न प्रशस्यः कथञ्चित्।
नो चेद् दद्यान्मन्दबुद्धिः पुनस्तत्
तन्निक्षेप-ग्रासवद् गर्हणीयम् ॥३३॥

ब्रह्मबलः। परमादरिणि कन्यके मम ! अपूर्वा खलु तव मातृप्रीति-भक्तिः।

पङ्कजनयना। धन्याऽहम् ! शृणु पितृदेव मम मर्मोत्थवाणीं पुनः कृपया।

मेघः पुष्टो भवति यदयं तोयमाहृत्य भूमे-
र्वृष्ट्या प्रत्यर्पयति स पुनस्तद्धि सर्वं सहायै।
किञ्च क्षारैरपि जलनिधेर्वारिभिः पूर्णकुक्षि-
र्दत्ते तोयान्यमृत-मधुराण्येष एवार्यमार्गः ॥३४॥
पित्रर्णेभ्यः पुनरतितरामात्मजो मुक्तिमिच्छन्
दद्याद्दाभ्यामयुतगुणितं जीवनान् न्यासभूतात्।
नैवासाद्यः कथमपि सुतेनात्मशुद्धिस्तथापि
मातापित्रोर्ऋणमिह यतोऽशोधनार्हं ब्रुवन्ति ३५॥

अभ्रप्रतिमः। परमादरिणि जननि ! अहं जाने सुनिश्चितमेव, यद् भवती अपि श्रेष्ठा देशप्रेमिका, देशसेवका, देशहिताकाङ्क्षिणी च। इयं देशभक्तिरेव भवत्यै कर्तव्यपथं निर्देक्ष्यति सत्वरम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आराधना। (शान्ता भूत्वा) सत्यम्। वत्स चम्पकवदन ! का तव मनोवासना ?

चम्पकवदनः। अहं देश-रक्षक-सैनिको भवितुमिच्छामि। ततोऽहं "जोयान"—दलगतो भविष्यामि शिक्षां समाप्य। प्रयोजनं चेत्—अहं साक्षात् समर-क्षेत्रे अस्त्रधारणं करिष्यामि निर्भयम्।

आराधना। (व्याकुला) कथम् ? कथम् ? प्राणाधिक ! तत् कथम् ?

चम्पकवदनः। सुधाघने मातः ! त्वं जानासि किल यत्, पुण्यभूमि-भारतवर्षम् अकस्मादाक्रान्तं दुर्धर्ष-शत्रुभिः। मम परमादरणीया सदानन्दमयी देशजननी साम्प्रतं जाता उद्वेगाकुला। कस्तस्या ललित-ललाटाच्चिन्तारेखां मार्जयिष्यति ? कस्तस्या विमल-वदनाच्छोक-कालिमानम् अपनेष्यति ? कस्तस्या ऋजु-हृदयात् शङ्कान्धकारं दूरीकरिष्यति ? कः मातः ! कः ! सन्तानं विना कः ?

मातः ! अहं देश-जनन्या दीनतमो हीनतमः क्षीणतमः सन्तानः। तथापि मम एकैको रक्तकणो वहति तदर्थम्, मम एकैको निश्वासः पतति तदर्थम्, मम एकैकं हृत्स्पन्दनं कल्पते तदर्थम् ; तदर्थं केवलम्, तदर्थं निरन्तरम, तदर्थं निःसंशयम्।

आराधना। स्नेह-कोमल पुत्रक मे ! चित्तचमत्कारिणी तव वाणी।

चम्पकवदनः। (भावाविष्टः) देश-जनन्याः सेवार्थम् अहं मम सर्व-प्राण-मान-धन-जन-त्यागाय दृढ़सङ्कल्पः। यातु यातु मम दीन-जीवनम्, यातु यातु मम सर्वस्वम्, यातु यातु मम पार्थिव-लाभाशा—यातु यातु तत् सर्वम्।

पङ्कजनयना। पुण्यश्लोक भ्रातृमहोदय ! तव वाक्यामृतधारा अस्माकं शप्त-तप्त-रिक्त-प्राणान् सञ्जीवयति मुहूर्तेन।

आराधना। प्राणप्रतिम अभ्र ! कस्तवाभिलाषः ?

अभ्रप्रतिमः। अहम् आकाश-यानचालको भवितुमिच्छामि।

आराधना। द्वयमेव समं विपज्जनकम्। तव मातापित्रोः किं मतम् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अभ्रप्रतिमः। तयोरनुमतिमहम् अवश्यमेव लप्स्ये।

ब्रह्मबलः। आर्ये! वृथा कालक्षेपो न वाञ्छनीयः। अत्र एक एव प्रश्नः—किं त्वं देश-जनन्या गभीर-संकटकाले तस्याः श्रीपादपद्मे आत्मनो यथासर्वस्वम् आत्मनः श्रेष्ठार्घ्यम् आत्मनः साररसं दातुं कामयसे न वा?

आराधना। अवश्यमेव कामये।

ब्रह्मबलः। ततः श्रीदेश-मातुः श्रीचरणारविन्दे सानन्दमर्पय तव पुत्र-रत्नम्। पुत्रो हि तव आत्मनो यथासर्वस्वम्, पुत्रो हि तव आत्मनः श्रेष्ठार्घ्यम्, पुत्रो हि तव आत्मनः साररसः। ततः पुत्रमेव समयर्पय देशदेव्याः पूजा-वेदीतले तवार्घ्य-रूपेण।

आर्ये! जानासि त्वं यत् देवचरणे सर्वश्रेष्ठमेव वस्तु समर्पणीयम्। पुत्रस्तव सर्वश्रेष्ठं वस्तु। ततस्तमेव देश-देव्याः श्रीचरणे समर्पय सानन्दम्।

आराधना। (अश्रूणि प्रमृज्य) प्राणधन पुत्रक मे! आगच्छ आगच्छ त्वम्। आगच्छ मम चक्षुषोरालोक! मम वक्षसो बल! मम कक्षायाः प्रदीप! आगच्छ आगच्छ त्वं मम तप्त-वक्षसि, मम शून्य-क्रोड़े शेषवारतः। अतः परं त्वं भविष्यसि देश-जनन्याः पुत्रः, न मम, न मम, न मम।

(सर्वे साश्रुनेत्रास्तिष्ठन्ति)

चम्पकवदनः। मातः! मातः! अहं सर्वदा तवैव पुत्रः, नान्यस्याः कदाचन।

आराधना। वत्स! गच्छ सानन्दम्, गच्छ साग्रहम्, गच्छ निर्भयं देशसेवार्थम्। नास्माकं चिन्ता त्वां पश्चादाकर्षतु नाम मुहूर्तमपि। केवलं सम्मुखे पश्य, सम्मुखे पश्य, सम्मुखे पश्य; केवलं प्राग्रेसरो भव, प्राग्रेसरो भव, प्राग्रेसरो भव; केवलं निवेदय आत्मानम्, निवेदय आत्मानम, निवेदय आत्मानम्।

भव दहन इव त्वं प्रज्वलन् वत्स! नित्यं
दह दुरितमसारं दारुवज्जीर्ण-शीर्णम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रसर सरिदिव त्वं शीतलीकृत्य तप्तां
कुरु हरित-सुशस्यामूषरां पुत्र ! पृथ्वीम् ॥३६॥
प्रवह पवनवत् त्वं धाव धूलिं निरस्य
जलमिव विषवाष्पं चोत्क्षिप प्राणखातात् ।
विकस कुसुमवत् त्वं दिक्षु वर्णान् सुगन्धान्
विकिर च मकरन्दं नन्दयन् नन्दन क्ष्माम् ॥३७॥
सर्वोपरिष्टाद् भव देशदीप
आलोकधारां वितरात्र देशे ।
मार्गच्युतो द्रक्ष्यति येन मार्गं
जनिष्यते येन च विश्वमिद्धम् ॥३८॥ (विशेषकम्)

वत्स ! भव "देश-दीपः", देशस्य घनायमान-तमिस्रा तवालोकेन भवतु विदूरिता अचिरेण ।

(समवेत-सङ्गीतम्)

श्रीश्री"जोयान"गाथा

हिमाचल-सम-समुन्नततराः सुरधुनीसम-प्रखराः ।
भारत-तनयाः सैनिकवरा विश्व-विस्मयप्रकराः ॥३९॥
अमले देशवेदीमूले निवेदित-रम-जीवनाः ।
अपराजिता यमभयरहिता निर्दोष-मनःप्राणाः ॥४०॥
देश-दीपाश्चिरप्रदीप्ता घोर-तमिस्र-नाशकाः ।
दुर्मद-दुर्ग-संसारपथे दुर्दम-शत्रु-शासकाः ॥४१॥
सत्य-शिव-सुन्दरप्रसराः धरणीकल्याणकराः ।
देशतरुणाः सैनिक-प्रवरा नित्य-न्यायपथचराः ॥४२॥

(सर्वे प्रस्थिताः)

समाप्तं चतुर्थ-दृश्यम्

—:०:—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चम-दृश्यम्

[विपुलविक्रमस्य प्रतिहिंसा]

स्थानम्—पल्लीभवनम्।

समयः—प्रभातम्।

(ततः प्रविशतो ब्रह्मबलः विषण्णवदना जीर्ण-शीर्णा आराधना च)

ब्रह्मबलः। अहो ! गतं मम हृदय-शोणित-पुत्र-धनम्। सर्वं शून्यम्, सर्वं शुष्कम्, सर्वं सुदुःसहम्।

आराधना। नाथ ! न पर्याकुलो भव। यदि दानादनन्तरं तदर्थं शोचेद् दाता ततो दानस्य महिमा विनश्येत् सर्वथा।

बहु-पुण्यफलेन आवाम् ईदृश-दानस्य सुयोगं प्राप्तवन्तौ, ततोऽनुशोचनया स व्यर्थो मा भूदिति मगैकान्तिकी कामना। पश्य—

प्रदाय दीप आलोकं धूपो गन्धं घनो जलम्।
निःशेषिता भवन्तोऽपि पश्चात्तापं न कुर्वते ॥४३॥
अपश्चात्तापिनां दानं जायते सफलं यतः।
अतो हि दानमेतेषां भवत्येवं सुसार्थकम् ॥४४॥

तथाहि—

अस्त्युर्वरा वृष्टिभिरूषरा धरा
त्विषा प्रदीपस्य समुज्ज्वला कुटी।
नितान्त-दुर्गन्धमुपेक्षितं स्थलं
सुगन्धितां याति च धूपवासितम् ॥४५॥
अतो हि देशमातुर्मे सेवायै तनयार्पणम्।
अनुशोचनया व्यर्थं मा भवत्विति मेऽर्थना ॥४६॥ (कुलकम)

ब्रह्मबलः। प्रिये ! विस्मय-विमूढो जातोऽहं त्वां दृष्ट्वा। तव सुदृढो मनोविक्रमः, स्थिरः सङ्कल्पः, गभीरो विश्वासश्च सर्वजनानुकरणीयः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आराधना। नहि नहि। न स्नेहवशेन माम् अकारणं प्रशंस।

ब्रह्मबलः। कुत्र मम प्राणप्रिया कन्यका ?

आराधना। सा शुश्रूषा-तत्त्व-शिक्षार्थं गता। मन्ये, सापि समर-क्षेत्रे शुश्रूषाकारिणीरूपेण गन्तुकामा।

ब्रह्मबलः। साऽपि आवां त्यक्ष्यति ? हा हतोऽस्मि !

आराधना। नाथ ! देश-मातुः पूजावेदीतले आवाभ्यां पुत्रो दत्तः सानन्दम् अर्घ्यरूपेण। ततः कथं कन्यापि न देया ?

ब्रह्मबलः। सत्यम्। किन्तु परिपूर्णतया शून्यं भविष्यति अस्माकं दीनगृहम्। तथापि का गतिः ?

(ततः प्रविशतो वेगेन गर्वोद्धतो विपुलविक्रमः, चाटुकारः खद्योतश्च।)

ब्रह्मबलः। (पर्याकुलः) सुस्वागतं श्रीविपुल-विक्रमस्य सुस्वागतम्। कृपया उपविशतु भवान्। (चाटुकारमुद्दिश्य) भवानपि उपविशतु।

आराधना। नमस्कारः। कथं भवान् अस्माकं क्षुद्र-कुटीरे आगतः अकस्मात् ? नेदमितः पूर्वं कदाचिद् भवत्पादरजोभिर्धन्यम्।

विपुलविक्रमः। (सदम्भम्) सत्यम्। न युष्माकं मृत्कुटीरं ममागमनयोग्यम्। तथापि अहमत्रागतो विशेषप्रयोजनवशात्।

खद्योतः। अस्माकं प्रभुमहोदय एतादृशे क्षुद्रातिक्षुद्रे मृत्कुटीरे न पदार्पणं कृतवान् पूर्वम्।

विपुलविक्रमः। खद्योत ! तूष्णीम्भव।

ब्रह्मबलः। महाशय ! किं प्रयोजनं भवतः मया सह ?

विपुलविक्रमः। शृणु त्वम् अतीव सौभाग्यजनकं प्रस्तावम्। अहं तव कन्यायाः पाणिप्रार्थी।

ब्रह्मबलः। आश्चर्यम् ! अविश्वास्यमेतत्।

विपुलविक्रमः। (सदर्पम्) असीम-सौभाग्यमेतद् युष्माकम्। ततो विवाहदिनं स्थिरीकुरु सत्वरम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

खद्योतः। दीनहीनस्त्वम्, तव स्वप्नातीतमिदम् अरे दरिद्र-पल्ली-वासिन्!

विपुलविक्रमः। खद्योत! न वृथा वागाडम्बरः करणीयः। (ब्रह्म-बलमुद्दिश्य) अत्र वृथा समयक्षेपो न वाञ्छनीयः। ततः स्थिरीकुरु सत्वरं विवाह-योग्य-दिनलग्नादिकम्।

ब्रह्मबलः। न जाने किं करणीयम् अत्र।

विपुलविक्रमः। हाः हाः हाः। अयमपि तव चिन्ताविषयः? अहमपि न तुभ्यं रोचे सुपात्ररूपेण? हाः हाः हाः!

खद्योतः। हाः हाः हाः! अतीव हास्यजनकमिदं सर्वम्।

आराधना। (सरोषम्) किन्तु कथम्? दीन-हीन-क्षीणा वयम् इति सत्यम्, तथापि पात्रनिर्वाचने अस्त्यस्माकं पूर्णस्वाधीनता।

विपुलविक्रमः। हाः हाः हाः! सत्यम् सत्यम्। किन्तु नाहं मनोनीतस्त्वया तव कन्याया योग्यपात्ररूपेण? हाः हाः हाः!

खद्योतः। हाः हाः हाः!

आराधना। सत्यमेव भणामि, भवत आचाराचरणानि चिन्ताधाराश्च मम कन्याया आचाराचरण-चिन्ताधाराभ्यः सम्पूर्णतो भिन्नानि।

विपुलविक्रमः। (सरोषम्) कथं कथम्?

आराधना। भवान् भोगसुख-लालितः विदेशिभावापन्नश्च। ममादरिणी कन्यका तु सातिशय-सरला, कृत्रिमताशून्या देशभक्ता च।

विपुलविक्रमः। (सोपहासम्) देशभक्तिः? फुः फुः फुः! सा हि भण्डतामात्रम्।

(ततः प्रविशति पङ्कजनयना)

पङ्कजनयना। का हि भण्डता?

विपुलविक्रमः। युष्माकं देशभक्तिः। सर्वथैव अलीका सा।

पङ्कजनयना। भवान् अस्मद्गृहे माननीयोऽतिथिः। ततो नाहं भवता सह वाग्युद्धे प्रवृत्ता भवितुमिच्छामि। केवलं वदामि, देशभक्तिर्हि मम प्राण-मनोजीवनस्वरूपा। भवान् निश्चितं जानातु—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पूजावेद्यां देशमातुर्ममैतान्
क्षुद्रान् प्राणान् ज्वालयिष्यामि दीपम्।
तुच्छात्तुच्छं मामकीनं मनश्च
तस्याः पूजाधूपरूपं विधास्ये।
दीनाद्दीनं निष्फलं जीवनं मे
नेष्ये पूजा-पुष्पसम्भार-शोभाम् ॥४७॥
श्रद्धादत्तं काष्ठमार्जारिकाया
दानं रामः सादरं पर्यगृह्णात्।
भक्त्या पूतं पूजनार्घ्यं ममेदं
देशाम्बापि स्वीकरिष्यत्यदूना ॥४८॥

विपुलविक्रमः। (विहस्य) सुन्दरि! भवतु तत्। प्राथम्येन मम विवाह-प्रस्तावस्त्वया स्वीकरणीयः।

पङ्कजनयना। (आश्चर्यान्विता) विवाहप्रस्तावः? कस्याः? केन सह?

विपुलविक्रमः। (विहस्य) तव, मया सह।

पङ्कजनयना। मम, भवता सह? असम्भवः।

विपुलविक्रमः। जाने, तव स्वप्नातीतमिदं सौभाग्यम्।

पङ्कजनयना। भद्र! न मम वाक्यस्य अन्यार्थं कुरु। नेदं मम स्वप्नातीतं सौभाग्यम्, प्रत्युत मत्पक्षे असम्भवम्। ततोऽहं श्रीविपुलविक्रम-महोदयम् असंख्य-धन्यवादान् विज्ञापयामि। किन्तु नायं विवाहप्रस्तावो मया ग्रहणीयः।

विपुलविक्रमः। (सरोषम्) कथं कथम्? किं न जानासि त्वं यत् अहं लक्षपतिरभिजातवंशीयः समाजशिरोमणिश्च? त्वं तु दीनदरिद्रा नीच-वंशीया शिक्षा-दीक्षा-विहीना च। तथापि मम विवाहप्रस्तावो न तुभ्यं रोचते? कथं तव एतादृशो दम्भः?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पददलित-तृणश्चेत् स्पर्धते भूरुहेण
क्षणिक-जललवश्चेत् सागरेणातलेन।
तुहिनशिखरिणा चेद् वालुका तुच्छतुच्छा
तदिह भवति हासोद्रेकहेतुर्महत्सु।
प्रचुर-बलयुतेन त्वं मया स्पर्धमाना
जगति किमु न गन्ता हन्त ! हास्यास्पदत्वम् ॥४६॥

पङ्कजनयना। दम्भस्य का कथा ? अहं दीन-दरिद्रा न तु नीचवंशीया। यथा तथा वा भवतु, भवतो विवाहप्रस्तावो न मह्यं रोचते।

विपुलविक्रमः। (सरोषम्) कथं कथम् ?

आराधना। न रोषपरवशो भवतु भवान् वृथा। भवतः अवमानना नास्माकम् उद्दिष्टा।

विपुलविक्रमः। (सदर्पम्) भवतु, भवतु। मत्तमातङ्गेन सह क्षुद्रातिक्षुद्र-पिपीलिकाया विरोधे को जयी भविष्यति ? कथय, कः ? युष्माकं मृत्कुटीरमिदं ममैव भूभागे वर्तते। अपेक्षस्व सुन्दरि ! अपेक्षस्व। मत्तमातङ्ग-पादपिष्टा पिपीलिका कथं जीवेत् ? मा विस्मर सुन्दरि ! तद् गर्वेण। हस्तागतं सौभाग्यं या दम्भेन त्यजति न सा दयार्हा। अहं यामि।

(चाटुकारेण सह प्रस्थितः)

ब्रह्मबलः। भगवन् ! किं तव विधानम् ? पुत्रविरहक्लिष्टा वयं मृता एव, किं मृतानां मारणमेव तवेच्छा ? भवतु तत्, भवतु तत्।

आराधना। आर्य ! श्रीभगवान् दीनजनवत्सलः। तस्य विधानानि सर्वथा मङ्गलमयानि सुनिश्चितम्।

पङ्कजनयना। मदर्थम् अयमकारण उत्पातः सञ्जातः।

आराधना। परमेश्वरो मङ्गलमयः। तस्य विधानानि न कदाप्यशुभानि। परम-न्यायवानपि सः। ततः श्रीभगवतो राज्ये नान्यायेन न्यायः पराजितो भवितुमर्हति कदाचन। (सर्वे प्रस्थिताः)

समाप्तं पञ्चम-दृश्यम्

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

षष्ठ-दृश्यम्

[पङ्कजनयनाया युद्धक्षेत्रगमनम्]

स्थानम्—नदीतीरस्थ-पर्णकुटीरम्।

समयः—सन्ध्या।

(ततः प्रविशन्ति ब्रह्मबलः, आराधना पङ्कजनयना च)

पङ्कजनयना। श्रद्धेय-मातापितरौ! समाप्ता खलु मम शुश्रूषा-विद्या-शिक्षा। अधुनाहं "शुश्रूषाकारिणी" पदवाच्या। अस्माकं प्राणप्रिय-"जोयान" भ्रातृवृन्दस्य सेवा-शुश्रूषादिविधौ अधुना मम पूर्णाधिकारः। अहो! सार्थकं खलु ममाधन्यं जीवनम्! प्रणमामि युवाम्, युवयोराशिषं कामये।

ब्रह्मबलः। परमादरिणि कन्यके! जीवनस्य सार्थकता हि सेवा। आहरणं वितरणेन, आदानं प्रदानेन, तत्त्वं च व्यवहारेण परिपूर्णतां लभन्ते।

आराधना। प्राणाधिके! तव पितुर्वचनं सत्यमेव। पश्य, जलाहरण-पुष्टस्य नव-नील-मेघस्य महाव्रत-समाप्तिर्जलदानेन। पश्य, मृत्तिका-रस-पुष्टस्य शतदलस्य सार्थकता सौन्दर्य-माधुर्यैश्वर्य-वितरणेन। प्राणप्रतिमे कन्यके मम! तद्वत् तवापि सम्पूर्णता भवतु परसेवया।

ऋणैः पञ्चभिरावद्धा जन्मनैव वयं भवे।
अनुष्ठेयं महायज्ञ-पञ्चकं तद्विशुद्धये॥५०॥
परेश-पितृ-गीर्वाण-नृ-भूत-सेवनात्मनः।
महाजीवन-यज्ञस्य भव होत्री तमस्य च॥५१॥ (युग्मकम्)

पङ्कजनयना। युवयोराशिष एव ममैकमात्रं सम्बलम्। प्राणप्रियौ मातापितरौ! युवयोः श्रीपादपद्मेषु मम एकैव प्रार्थना।

ब्रह्मबलः। किं त्वं वाञ्छसि प्राणप्रतिमे? न किञ्चिदपि तुभ्यमदेयम् अस्ति आवयोः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आराधना। न जाने कथं मम मन उद्वेल्लति।

पङ्कजनयना। अहं युद्धक्षेत्रे गन्तुमिच्छामि।

ब्रह्मबलः। युद्धक्षेत्रे ? कथं कथम् ?

आराधना। कथं न त्वं साधारण-जनानां सेवा-शुश्रूषादिकं जीवन-व्रतं करिष्यसि ? तेऽपि सेवार्हाः, तेषां सेवैव प्रकृत-सेवा।

पङ्कजनयना। स्नेहकोमले मातः! साधारण-जनानां सेवा-शुश्रूषादि-करणाय अन्याः सेवका अनायासेन लब्धव्याः। युद्धक्षेत्रे तु सेवका दुर्लभाः, अथच तत्रैव शुश्रूषाकारिणीनां प्रयोजनं समधिकम्।

ब्रह्मबलः। न जाने किमत्र करणीयम्।

आराधना। वत्से! आवां प्रत्यपि सन्ति तव कर्तव्यानि। त्वं जानासि किल सर्वं वृत्तान्तम् आदित आन्तम्। प्रतिहिंसा-परायणेन विपुल-विक्रमेण वयं पूर्वतन-गृहाद् निष्काशिताः। ततः श्रीभगवत्कृपया नदीतीरस्थे अस्मिन् पतिते भूमिखण्डे कष्टेन मृत्कुटीरं निर्मायात्रैव कायक्लेशेन निवसामः। ईदृशावस्थायां परिणतवयस्कौ सहाय-सम्बलहीनौ आवां परित्यज्य युद्धक्षेत्रे गमनं किं न असमीचीनमेव ?

पङ्कजनयना। (चिन्ताकुला) सत्यं मातः! सत्यम्। ततः किं करोमि ? अस्माकं वीर-"जोयाम्"-भ्रातृवर्गस्य सेवार्थम् आकुलीभूता मम प्राणाः, अथच मातापितरौ युवामपि सेवनीयौ।

आराधना। एवं तर्हि वत्से! निर्भयमनुसर तवात्मनिर्देशम्—न चिन्तय अस्मदर्थम्।

(ततो वेगेन प्रविशन्ति ग्रामरक्षिणः—कमलः प्रवालः पेलवश्च)

कमलः। ज्येष्ठ-भगिनि! त्वम् अत्र वर्तसे, त्वदर्थं वयम् इतस्ततः परिभ्रमणशीलाः।

पङ्कजनयना। तत् कथम्, किं युष्माकं प्रयोजनं मया ?

कमलः। त्वं ग्रामस्य अधिनेत्री। त्वया प्रयोजनम् अस्माकं क्षणे क्षणे।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पङ्कजनयना। (विहस्य) न ज्ञातवती अहम् एतावत्कालं यावत् यदहम् ईदृश-महामान्या जाता।

(सर्वे हसन्ति)

कमलः। अलम् उपहासेन। सत्यमेव त्वम् अस्माकं निर्भरस्थानम्।

पङ्कजनयना। भ्रातरः! कथयत, का युष्माकं मनोवासना?

कमलः। अस्माकं शुश्रूषाशिक्षणकेन्द्रे प्रधानकार्यालयाद् वार्ता प्रेरिता यत् समरक्षेत्रे त्वरितं शुश्रूषाकारिण्यः प्रेरयितव्याः।

पङ्कजनयना। अहो! अत्र तादृशी एकापि नास्ति, किं करणीयम्? (निमेषेण सङ्कल्पं स्थिरीकृत्य) भ्रातरः! अहमेव यास्यामि रणक्षेत्रम्। मुहूर्तात् प्रागेवाहं मम जनक-जननीसकाशे एतदेव निवेदितवती सविनयम्।

कमलः। सत्यम्? आश्चर्यम्!

पङ्कजनयना। किन्तु एका मे चिन्ता समस्या वा। परिणतवयस्कयोः परम-श्रद्धेययोर्मातापित्रो रक्षणावेक्षणे कः करिष्यति? इति।

कमलः। प्राणप्रिये भगिनि! तव मातापितरौ वयं स्वीयमातापितृ-रूपेण सेविष्यामहे—इति तव पुण्यपादस्पर्शनेन प्रतिजानीमहे।

(सर्वे तथा कुर्वन्ति)

पङ्कजनयना। (साश्रुनेत्रा) उत्तिष्ठत कमल, पल्लव, पेलव! कल्याणं वो भूयात्।

पूजनीयौ मातापितरौ! युवयोरभिमतं श्रोतुमिच्छामि एतद्विषये। युवयोरिच्छैव बलीयसी।

ब्रह्मबलः। (साश्रुनेत्रः) मम पर्णकुटीरं शून्यं भविष्यति सम्पूर्णतः। तथापि भवतु भगवदिच्छा पूर्णा।

आराधना। (शान्ता) जीवनस्वरूपे कन्यके! गच्छ सानन्दं विश्वसेवार्थम्, गच्छ सानन्दं देश-जननीपूजनार्थम्, गच्छ सानन्दं ग्राम-गौरववर्धनार्थम्। मा उद्विग्ना भव अस्मदर्थं मुहूर्तमात्रमपि। परमा जननी कृपया आवां रक्षिष्यति सुनिश्चितम्। निश्चिन्तं गच्छ, निर्भयं गच्छ, निःसंशयं गच्छ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परेशमङ्गलेच्छया चलत्यहो जगत् सदा
विधानमस्य शृङ्खलायुतं जगद्धितावहम्।
निशावसानतो दिनं तपात्यये घनागमः
सुखेन दुःखमन्वितं युतश्च धर्ममेनसा ॥५२॥
तथापि सोऽशेष-कृपाभरेण नो
न्यवीविशद् दुर्लभ-पादपङ्कजे।
न तावदेवाङ्कतलेऽपि कोमले
उरस्यपि स्वे नहि नो न्यवेशयत्? ॥५३॥ (युग्मकम्)

(ततः प्रविशति वेगेन विपुलविक्रमः)

विपुलविक्रमः। (पङ्कजनयनामुद्दिश्य) भद्रे! अनुतापानलदग्धोऽहम्। क्षमतां मां कृपया। मम पूर्वतनः प्रस्तावः किं न भवत्या पुनर्विवेचनीयः?

पङ्कजनयना। असीमा खलु भवतः कृपा। अहन्तु मातापित्रोरनुमतिक्रमेण युद्धक्षेत्रे शुश्रूषाकारिणीरूपेण गमनोद्यता, अस्माकं प्राणप्रिय-"जोयान"-भ्रातृवृन्दस्य सेवार्थम्।

विपुलविक्रमः। (सोद्वेगम्) अत्रैवाहं भवत्या देशसेवार्थं सर्वां व्यवस्थाम् अचिरेण सुष्ठुरूपेण च करिष्यामि। तिष्ठतु भवती सानुग्रहम अत्रैव। अतीव विपज्जनकं युद्धक्षेत्रम्।

पङ्कजनयना। पुनरपि कथयामि, असीमा खलु भवतः कृपा! अहन्तु दृढ़सङ्कल्पा युद्धक्षेत्रे गमनाय। क्षमतां मां सानुग्रहम्। भवान् मम मातापितरौ रक्षतु कृपया। एवं हि चिरकृतज्ञता-पाशबद्धा स्थास्यामि।

विपुलविक्रमः। (मातापितरौ उद्दिश्य) पूजनीयौ मातापितरौ! अद्यावधि युवयोरहं द्वितीयः पुत्रो जातः।

ब्रह्मबलः। कल्याणं ते भूयात्।

आराधना। जगन्माता त्वां रक्षतु निरन्तरम्।

विपुलविक्रमः। धन्योऽहम्।

(सर्वे प्रस्थिताः)

समाप्तं षष्ठ-दृश्यम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सप्तम-दृश्यम्

[कौतुक-दृश्यम्]

स्थानम्—पल्लीपथः ।

समयः—प्रभातम् ।

(ततः प्रविशति विषण्णवदनः मत्स्यविक्रेता कुक्कुटः)

कुक्कुटः । अहो ! मम चिरमृता मत्स्या आतपेन विगलिता दुर्गन्ध-पूरिताश्च । तथापि एते विक्रेतव्याः, अन्यथा मम महती आर्थिक-क्षतिः संजनिष्यते । किं करोमि, कथमेतान् विक्रीणे ?

ततः प्रविशति विषण्णवदनः फलविक्रेता पेचकः)

कुक्कुटः । भ्रातः, भ्रातः ! त्वरितम् अत्रागम्यतां कृपया ।

पेचकः । कस्त्वम् ? किं ते नाम ? का वा जीविका ?

कुक्कुटः । अहं कुक्कुटनामधारी मत्स्यविक्रेता । कस्त्वम् ? किं ते नाम ? का वा जीविका ?

पेचकः । अहं पेचकनामधारी फलविक्रेता ।

कुक्कुटः । मधुरतमं नाम तव ।

पेचकः । मोहनतमं तवापि नाम ।

कुक्कुटः । (विहस्य) ततः आवाम् अद्यावधि शाश्वत-बन्धुत्व-सूत्रावद्धौ जातौ ।

पेचकः । शोभनः प्रस्तावोऽयम् । (उभौ आलिङ्गतः)

कुक्कुटः । शृणु रे प्राणसख ! मम आतप-विगलिता मत्स्या दुर्गन्ध-परिपूर्णा जाताः, ते न भोजनयोग्याः सत्यम् । तथापि मम-बहुलार्थिक-क्षति-निवारणाय तद्विक्रयोपायः सत्वरमेव चिन्तनीयः ।

पेचकः । शृणु रे जीवनरस ! ममापि अनुरूपं चिन्ताविषयम् । ममापि सुचिर-संग्रहीतानि फलानि रौद्राधिक्येन विगलितानि दुर्गन्ध-पूर्णानि च,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ततो न ग्रहणयोग्यानि। तथापि ममार्थिक-क्षतिनिवारणाय तान्यपि अचिरेण विक्रेतव्यानि। ततः किम् आवां प्राणबन्धू कुर्वः? (चिन्तां नाटयित्वा, सानन्दम्) हृदयघन! उपायः प्राप्तः, उपायः प्राप्तो मया। शृणु, शृणु। तव विगलितान् पूतिगन्धींन् मत्स्यान् नवीन-मत्स्य-धौतजलेन सिञ्च, तेन तेषां पूतिगन्धो गुप्तीभविष्यति सुनिश्चितम् एव। अतः परं रक्तवर्णेन मत्स्य-खण्डानि मत्स्य-कर्णान् वा रञ्जय, तेन ते नवीन-सरस-नव-रक्तपूर्णा इति प्रतिभास्यन्ति निश्चितम्।

कुक्कुटः। (सानन्दम् उच्चैः) त्वं हि भारतवर्षस्य प्राज्ञश्रेष्ठः, त्वं हि मम जीवनरक्षकः। अशेष-सौभाग्यान्मया त्वद्दर्शनं त्वद्बन्धुत्वञ्च लब्धे विद्यावारिधे!

पेचकः। किन्तु, हृदयभास्कर! किं ममादृष्टम्? चिन्तय मम रक्षोपायं कृपया।

कुक्कुटः। निश्चितम्। (चिन्तां नाटयित्वा, सानन्दम्) प्राण-प्रदीप! उपायो लब्धः मयापि, शृणु शृणु। तव अपूतीभूतानि फलानि सज्जीकुरु फलाधारोपरि। ततो विक्रय-काले संगोपनं हस्त-कौशलेन अपूति-गन्धि-फलस्थले पूतिगन्धि-फलानि निवेशय।

पेचकः। (सोल्लासम् उच्चैः) त्वं हि भारतवर्षस्य ज्ञानमार्तण्डः। त्वं हि मम प्राणभ्राता। बहुजन्म-सञ्चित-पुण्येन अहं तव श्रीमुख-दर्शनं तव मधुर-सौख्यञ्च प्राप्तवान् बुद्धिसरित्सागर!

कुक्कुटः। तत आलिङ्ग मां हृदय-निकुञ्ज-कोकिल!

पेचकः। त्वमपि माम् आलिङ्ग संसारार्णव-पोत!

(उभौ आलिङ्गतः)

कुक्कुटः। आनन्दरत्नाकर! यतोऽस्माकं सर्वाः समस्याः समाहिताः, ततः कियत्कालम् आवाम् उपविशावः विश्रामार्थं कथोपकथनार्थञ्च।

पेचकः। मनोहरः खलु अयं प्रस्तावः। (उभावुपविशतः)

पेचकः। प्राणनिर्झर! कथय! का जगतो वार्ता?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कुक्कुटः। नाहं जगद्विषये आसक्तः। तथापि तवावगत्यर्थं वदामि, विश्वयुद्धं समागतप्रायम्।

पेचकः। विश्वयुद्धम्? किं तत्?

कुक्कुटः। पेचकस्त्वम्, दिवाभागस्य वार्तां कथं त्वं ज्ञास्यसि?

पेचकः। (विहस्य) वाढ़म्। तवैवात्र सर्वथाधिकारः। कुक्कुटस्त्वम्, दिवाभागस्स्तव विशेष-परिभ्रमणसमयः, कणशः खाद्यान्येषणावसरश्च।

कुक्कुटः। (विहस्य) ग्रीष्ममध्याह्न-मार्त्तण्ड-मरीचिसमा प्रखरा खलु तव बुद्धिः। शृणु! भारतवर्षं साम्प्रतं वहिःशत्रुभिराक्रान्तम्।

पेचकः। सत्यम्? ततस्ततः?

कुक्कुटः। ततोऽस्माकं प्रधान-मन्त्रिमहोदयः सर्वान् व्यवसायिनः न्याय-धर्मपथानुसरणार्थमनुरुद्धवान्। हाः हाः हाः!

पेचकः। हाः हाः हाः! देशस्य युद्धं देशस्यैव तिष्ठतु, तेन अस्माकं किम्? कथं वयम् अस्माकं न्याय्य-लाभोपायान् त्यक्ष्यामः? न वयं तादृशा निर्बोधाः।

कुक्कुटः। किन्तु जीवनसौरभ! पृथिव्यां निर्बोध-जनानामप्यभावो नास्ति। न जानासि किल यत्, अस्माकं ग्रामस्य सुन्दरीश्रेष्ठा पङ्कजनयना धनिश्रेष्ठ-विपुलविक्रमस्य विवाह-प्रस्तावं प्रत्याख्याय साधारण-शुश्रूषाकारिणी-रूपेण रणक्षेत्रं गता?

पेचकः। गर्दभीसमा सा। धनिनो गृहिणीपदं त्यक्त्वा भीषण-विपज्जनक-संग्रामस्थले का वा याति गर्दभीं विना? सत्यमेव गर्दभीपुङ्गवा सा। अभूतपूर्वम् एतत् सर्वम्।

कुक्कुटः। (उच्चैर्हसित्वा) हाः हाः हाः! "गर्दभीपुङ्गवा"? हृदय-रञ्जक! अतिसुरसिकस्त्वम्, पक्व-रसालवद् रसपूर्णः। हाः हाः हाः!

(ततः प्रविशतः सम्मार्जनीहस्ता मार्गपरिष्कारिका छुरिकाहस्ता मांसविक्रेत्री च)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मार्गपरिष्कारिका। (सरोषम्) कौ युवाम्? अपसरतम्, मुहूर्तेन अपसरतं मम मार्गात्। न विलम्बः सहनीयः। सङ्कटकाले अलसता सर्वथा वर्जनीया।

पेचकः। सङ्कटकाले? कस्य सङ्कट-कालः?

मार्गपरिष्कारिका। किं त्वं बुद्धिविहीनो जडः? गर्दभपुङ्गवो वा? न जानासि किल यत् देशस्य सङ्कटकालोऽधुना समुपस्थितः?

कुक्कुटः। देशस्य सङ्कट-कालो देशस्यैव, तेनास्माकं किम्?

मार्गपरिष्कारिका। हा हतास्मि! किमयं कथयति? अरे रे गर्दभपुङ्गव! न देश इष्टक-प्रस्तराणां समाहारः, देशो देशवाशिनां राशिरूपः। अत एव देशस्य सङ्कट-कालो देशवासिनाम् एव—अस्माकम् एव।

कुक्कुटः। (सरोषम्) अरे रे खिङ्करीशोभिनि? छुछुन्दरि! गगन-स्पर्शिनी तव स्पर्धा! न माम् अकारणं दूषय। न मां "गर्दभपुङ्गव" इति कथय। गर्दभपुङ्गवा हि त्वम्, गर्दभपुङ्गवा हि तव प्राणप्रिया पङ्कजनयना—या धनिगृह-सुख-स्वाच्छन्द्यं हित्वा निर्बोधावद् युद्धक्षेत्रं गता।

मांसविक्रेत्री। अरे रे क्षुरधार-जिह्व! पङ्कजनयनायाः स्वार्थत्यागः सर्वेषामेव अनुकरणीयः। भवतु। न मम बान्धवीं मार्गपरिष्कारिकाम अकारणं दूषय। सत्यमेव, न त्वं निरीहो गर्दभः, त्वम् अतिकुटिलो मर्कटः अतिहिंस्रो वृकश्च।

पेचकः। (सरोषम्) अरे रे कृन्तनिकाशोभिनि! गन्धहस्तिनि! मम बान्धवं कुक्कुटं नाकारणं निन्द। असहनीयं तवौद्धत्यम्। (सोपहासम्) किं युवां बान्धव्यौ? अतिसमीचीनम् एतत्, अतिसुष्ठु शोभनम्।

मार्गपरिष्कारिका। (सरोषम्) कथम् कथम्?

पेचकः। (सोपहासम्) एतदेव तस्य कारणम्—मार्गपरिष्कारिका सर्वदा सुगन्धप्रपूरिता मांसविक्रेत्री च तथैव। ततो मन्ये, योग्यया योग्या मिलितेति। हाः हाः हाः!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कुक्कुटः। हाः हाः हाः! रससागर! पूर्वमेव मयोक्तं यत् त्वम् अतिसुरसिकः। मलसुरभिर्मांससुरभिश्च सम-पर्यायभूतौ; हाः हाः हाः! ततो मलमार्जिका मांसकर्तिका प्राणप्रिये बान्धव्यौ—इति अतिस्वाभाविकमेव। हाः हाः हाः!

पेचकः। हाः हाः हाः!

मार्गपरिष्कारिका। (कुक्कुटमुद्दिश्य) रे रे पापात्मन्! अहं मलपरिष्कारिका, न तु मललिप्ता। तव तु सुरभिर्मल-सुरभेस्तीव्रतरः। (नासिकां वसनाञ्चलेन आवृत्य) ओयाक्, ओयाक, थुः, थुः, किम् अस्ति तव पेटिकाभ्यन्तरे?

कुक्कुटः। (पर्याकुलः) मम नवीनाः सरसा मत्स्याः केवलम्, नान्यत् किमपि, नान्यत् किमपि।

मार्गपरिष्कारिका। न विश्वसिमि, न विश्वसिमि। न हि नवीनाः सरसा मत्स्या एतादृश-पूतिगन्धमया भवन्ति।

मांसविक्रेत्री। (पेचकमुद्दिश्य) रे रे दुरात्मन्! अहं मांसविक्रेत्री न तु मांसलिप्ता। तव तु सुरभिर्मांससुरभेस्तीव्रतरः। (नासिकां वसनाञ्चलेनावृत्य) ओयाक् ओयाक्, थुः थुः! किमस्ति तव पेटिकाभ्यन्तरे?

पेचकः। (पर्याकुलः) नान्यत् किञ्चिदपि, नान्यत् किञ्चिदपि; मम सुमधुराणि सुमिष्टानि फलानि केवलम्।

मांसविक्रेत्री। न विश्वसिमि, न विश्वसिमि। सुमधुराणि सुमिष्टानि फलानि नैतादृश-दुर्गन्ध-परिपूरितानि भवन्ति।

मार्गपरिष्कारिका। प्रिय-भगिनि! अहं मम सम्मार्जनीमुत्तोल्य दण्डायमाना तिष्ठाम्यत्र। त्वं कृपया मत्स्य-पेटिकामेतां परीक्षस्व।

कुक्कुटः। अरे रे रे दुर्वृत्ते! दूरमपसर, दूरमपसर।

मांसविक्रेत्री। (कुक्कुटस्य पेटिकां परीक्ष्य) प्रिय-भगिनि! अत्र सन्ति विगलिताः पूतिगन्धमया बहवो मत्स्याः, तेषामेव महासुरभिरेषः। ततस्ते ध्वंसयोग्याः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मार्गपरिष्कारिका। अवश्यम्।

मांसविक्रेत्री। प्रिय-भगिनि! अहं छुरिकामुत्तोल्य दण्डायमाना तिष्ठाम्यत्र। त्वं कृपया फल-पेटिकामेतां परीक्षस्व।

पेचकः। रे रे पिशाच-वदने! दूरं याहि दूरं याहि।

मार्गपरिष्कारिका। (पेचकस्य पेटिकां परीक्ष्य) अहो! विराजन्ते अत्र विगलितानि बहुविधानि पूतिगन्धि-फलानि, तानि न भक्षणयोग्यानि।

मांसविक्रेत्री। तत आवां मत्स्यान् फलानि च नदीजले निक्षेप्स्यावः।

कुक्कुटः। अयि स्पर्धाशीले! न तत् करणीयं, कदापि न; कदापि न। एवं मम शत-मुद्रा विनष्टा भविष्यन्ति।

पेचकः। ममापि।

मांसविक्रेत्री। तेन किम्? इमे मत्स्या यमद्वारस्वरूपाः, इमानि फलानि च तथैव। युवयोः शत-शत-मुद्राभ्योऽपि मनुष्य-जीवनानि शत-शत-गुणैर्गरीयांसि।

मार्गपरिष्कारिका। निश्चितम्।

कुक्कुटः। युवामहं खण्डशः कुट्टयामि।

पेचकः। अहञ्च।

मार्गपरिष्कारिका। अरे रे! मनुष्यहत्याकारिणौ! पादमेकम् आगच्छेतं चेत् इयं सम्मार्जनी युवयोः पृष्ठदेशे पतिष्यति सवेगम्।

मांसविक्रेत्री। मम छुरिकापि। सावधानौ भवतम्।

(ततः उभे मत्स्यान् फलानि च नदीजले निक्षिपतः)

मार्गपरिष्कारिका। अरे रे कृष्णहृदयौ! देशस्य सङ्कट-काले पापाचारा विशेषेण वर्जनीयाः।

मांसविक्रेत्री। ततो युद्धक्षेत्रं गत्वा युवयोः पूर्वतन-पापानां प्रायश्चित्तं कुरुतम्।

(उभे प्रस्थिते)

कुक्कुटः। (रोदनपरः) हो हो हो! यथासर्वस्वं मम विनष्टम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पेचकः। तथैव ममापि।

कुक्कुटः। (सरोषम्) सर्वे दोषास्तवैव। कथं त्वं कोपिन्या भामिन्या सह कथोपकथने प्रवृत्तवान्?

पेचकः। (सरोषम्) सर्वे दोषास्तवैव। कथं त्वं प्रचण्डां चामुण्डां "छुछुन्दरी" इति दूषितवान्?

कुक्कुटः। रे रे रे पिशाचानन पेचक!

पेचकः। रे रे रे मलखादक कुक्कुट!

कुक्कुटः। रे रे रे!

पेचकः। रे रे रे!

(उभौ कलहरतौ प्रस्थितौ)

समाप्तं सप्तम-दृश्यम्

—०—

अष्टम-दृश्यम्

[युद्धक्षेत्रे "जोयान"-रूपी चम्पकवदनः]

स्थानम्—भारतवर्षस्य हिमाचलाञ्चलीय-प्रत्यन्तदेशः।

समयः—ऊषा।

श्रीश्रीभारतजननी-वन्दना

(समवेत-सङ्गीतम्)

हिमाचल-शुभसुतां विभुपदचिरपूतां
प्रणौमि भारत-जननीम्।
विबुधकुल-पूजितां मधुपदल-कूजितां
शरणीं वरणीं धरणीम्॥५४॥
मधुर-मोह-महितां सकल-शोक-रहितां
तुहिन-किरीट-भूषिताम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्यामल-वन-ललितां कोमल-घन-कलितां
लोभन-लतिका-लुलिताम् ॥५५॥
वीर-सुत-दर्पितां धीरजन-तर्पितां
शाश्वत-साधनार्जिताम् ।
विश्वरस-चर्चितां निःस्व-हृदयार्चितां
हिंसा-द्वेष-वर्जिताम् ॥५६॥

(ततः प्रविशतः सहास्य-वदनौ "जोयान" दलान्तर्गतौ
चम्पकवदनो जाहाङ्गीरश्च)

चम्पकवदनः । अहो ! मनोमोहनोऽयं देशः ! मन्ये पृथिव्या इयं सीमारेखा, स्वर्गराज्यस्य प्रारम्भश्च । पश्य पश्य ! चतुर्दिक्षु प्रसारिता उत्तुङ्ग-पर्वतमालाः, परिहित-तुषार-किरीटाः सहास्य-वदनाः शान्ताः स्निग्धाः सौम्याश्च । उदेति प्रदीप्तः प्रसन्नः प्रफुल्लस्तरुणस्तपनः दिग्दिगन्तेषु किरण-जालानि प्रसार्य । तस्य स्नेह-स्पर्शेनेव मुहूर्तेन तानि शुभ्र-तुषार-मुकुटानि सुवर्ण-रूपाणि धारयन्ति । कथं कथम् ? यतो महास्पर्शमणिप्रतिमोऽयं भास्वरो भास्करः, यस्य प्रभाभिः सर्वान्धकाराणि सर्वपापानि सर्वदुःखानि च परिणमन्ते आलोकरूपेण पुण्यरूपेण आनन्दरूपेण च यथाक्रमम् । अथवा, महामायावी अयं महिममयो मरीचिमाली, यस्य माया-तुलिकया मुहूर्तेन सुवर्णायते लौह-कृष्णमपीदं जगत् ।

महामणिकार ! महामायाधर ! भगवन् मार्तण्ड ! प्रणमामि भवन्तम् । तवालोकधारा अमृतनिर्झरिणीव अस्मान् सर्वान् सञ्जीवयतु ।

सूर्य-वन्दना

जय जगदीश्वर ! सेवकशङ्कर ! दैन्यतिमिरहर ! धन्यजने !
जगदनुरञ्जन ! तमि-तनु-खञ्जन ! हिमभय-भञ्जन ! कञ्जवने ॥५७॥
आन्ध्य-रुजेन्धन-दीप्तविरोचन ! मान्द्य-विमोचन ! घस्रमणे !
मण्डल-मण्डन ! मरताखण्डन ! जडता-वारण-चण्डसृणे ! ॥५८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

हे दिवसेश्वर ! कीर्ण-किरण-शर-दीर्ण-दुरित-दर ! तीक्ष्ण-घृणे !
आमय-चलदल-बलिदन्तावल ! दावानलवल ! शीत-तृणे ॥५९॥
चिर-विरहाकुल-कोकयुवतिकुल-शोकनयनजल-शोष-शुचे !
शीत-पीत-जल-शीर्ण-निखिलदल-शङ्कित-शतदल-नन्दिरुचे ॥६०॥

जाहाङ्गीरः। प्राणप्रिय भ्रातृवर ! चम्पकवदन ! अपूर्वा खलु तव वर्णना। अहं पुनर्मन्ये, राजराजेश्वरस्य हिमाचलस्य प्राभातिकी सभेयम्। यत्र सहस्राणि स्वर्ण-किरीट-शोभितानि शृङ्गाणि सामन्त-राजन्यवत् राजन्ते नतशिरस्कम्।

हिमाचल-वन्दना

महाबलधरो महिम-सञ्चरो
मूर्त्त-महेश्वरः खरः।
अमर-गिरिवरो विश्व-शुभङ्करो
राजराजेश्वर-वरः ॥६१॥

स्नेह-निर्झरो नित्यनिर्जरो
निरञ्जनो निष्पारः।
स्वात्मनिर्भरः स्वार्थ-निःसरो
भारत-सारात् सारः ॥६२॥

चम्पकवदनः। प्राणप्रतिम भ्रातृवर ! जाहाङ्गीर ! अपरूपा खलु तव हिमाचल-वन्दना।

(विहस्य) साम्प्रतं तु स्वर्ग-राज्यास्थिताद् देववन्दिताद् अप्सरोनन्दिताद् दुन्दुभि-मन्द्रितात् पारिजात-पुष्पशोभितान्नन्दन-काननादुत्तरणसमयः समागतोऽस्माकम्। कठिनमिदं विश्वब्रह्माण्डम्, कठिनानि नाम अस्माकं कर्तव्यानि। ततः स्वप्नं हित्वा मायां जित्वा कल्पनां त्यक्त्वा वास्तव-व्यापारान् चिन्तय।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

खर-रविकरभासा म्लानमध्वप्ररूढं
स्खलति तृणकपुष्पं हा मुहूर्तेन यादृक्।
स्फुटति नभसि यादृग् बुद्बुदः सद्य एव
क्षणसमयविनाशी तादृगेवास्ति जीवः ॥६३॥

जाहाङ्गीरः। (विहस्य) सत्यम्। वस्तुतः पर्वत-शिखरस्थिता कुज्झटिकेव क्षणस्थायिनी अस्माकं स्वप्नमाया। सैनिका वयम्, सर्वदा जीवन-मरणयोः सन्धिस्थल एव स्थिताः सर्वथा, आकस्मिक-मरणसम्मुखीनाश्च।

अम्भोबुद्बुदवत् क्षणाय सुषमासम्भारसम्भूषितं
मार्गारूढ़-तृणाग्रवर्तितुहिन-ध्वंसि क्षणात् सर्वदा।
सद्योभङ्गुर-काचपात्र-रुचिरं मायामरीचिप्रभं
सैन्यानां वत जीवनं यदपि नः श्लाघ्यं तथापीष्यते ॥६४॥

यथेन्द्रचापो निमिषान्निलीयते
यथा मरौ वारि विशुष्यति क्षणात्।
गलत्यकाले तृणपुष्पकं यथा
तथास्ति नो जीवनमेतदस्थिरम् ॥६५॥

चम्पकवदनः। प्रिय भ्रातः जाहाङ्गीर! तथाप्यस्माकं मनसि भयलेशोऽपि नास्ति। कुतः? यतो नायं साधारणः संग्रामः, नायं स्वार्थान्देषी कलहः, नायं निष्ठुरः प्राणवधः! अयम् आदर्शार्थः संग्रामः, अयं न्यायार्थः कलहः, अयं धर्मार्थः प्राणवधः।

जाहाङ्गीरः। साधु साधु साधु।

चम्पकवदनः। वस्तुतस्तु, नायं संग्रामः, नायं कलहः, नायं प्राणवधः। इयं तपस्या, इयं साधना, इयम् आराधना। इयं सत्यस्य तपस्या, इयं शिवस्य साधना, इयं सुन्दरस्य आराधना। इयं पूजा, मातृपूजा केवलम्। पूजैव सर्व-शोक-शङ्का-सङ्कट-विनाशिनी। अत एव प्रतिमुहूर्तं भीषण-मरण-सम्मुखीना अपि वयं शोक-शङ्का-सङ्कट-विहीनाः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जाहाङ्गीरः। हृदयोल्लासिनी तवेयम् अमृतमयी वाणी।

(वहिः शब्दः)

जाहाङ्गीरः। (निम्नस्वरेण) वन्धुवर ! सावधानो भव। शत्रुपरिवृतं गुप्तचर-सङ्कुलम् आकाशच्छत्र-निक्षिप्त-घातकपूर्णञ्चेदं स्थानम्।

(ततः प्रविशति पार्वत्यदेशीय-ग्रामवासिच्छद्म-वेशधारी कश्चिद् गुप्तचरः)

गुप्तचरः। (सारल्यं नाटयित्वा) भद्रमहोदयौ ! वुद्धिविहीनः सहाय-सम्वलहीनो ग्रामवासी अहम्, पथिभ्रष्टोऽस्मि। किं भवन्तौ मम सहायौ भविष्यतः कृपया ?

जाहाङ्गीरः। (कठिनः) को भवान् ? किं भवान् वाञ्छत्यस्मत्-सकाशात् ?

गुप्तचरः। अहं भृशं क्लान्तः। कृपया भवान् मह्यम् आश्रयं ददातु। कुत्र भवतोः शिविरम् ? सानुग्रहं तत्र मां नयतु त्वरितम्।

चम्पकवदनः। (विहस्य) भ्रातः ! किं भवान् आवां निर्वोधश्रेष्ठौ गणयति ?

गुप्तचरः। (त्रस्त-ध्यस्तः) कथं, कथं भवान् इत्थं भाषते ? कः खलु मम दोषः ? सरलः कोमलो दुर्वलो ग्रामवासी अहम् (छलेन रोदिति)

जाहाङ्गीरः। सरल-कोमल-दुर्वलान् ग्रामवासिनो वयं वहुशो दृष्टवन्तः, न भवान् तादृशः।

गुप्तचरः। (स्वगतम्) अहो ! विदितोऽस्मि। ततः पलायनम् एव वरम् (पलायनोद्यतः)।

चम्पकवदनः। पादमेकं न गच्छ। अहं त्वां वन्दीकरिष्यामि, अरे रे गुप्तचर !

गुप्तचरः। (झटिति पिस्तलं निष्काश्य) रे रे कुत्सित-कुक्कुर ! रे रे मललिप्त मर्कट ! रे रे शठ शृगाल ! मूर्ख संस्काराच्छन्न वर्वर भारतवासिन् ! गगनस्पर्शिनी तव स्पर्धा ! त्वं मां वन्दीकरिष्यसि ? हाः हाः हाः ! तच्-चमत्कारिघटनाया वहुपूर्वमेवाहं त्वां यमालयं प्रेरयिष्यामि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गृहाण रे रे पाषण्ड ! गृहाण रे रे दुर्वृत्त ! गृहाण रे रे घातक ! तवौद्धत्यस्य समुचितं फलम्। (पिस्तलमुत्तोल्य चम्पकवदनमाक्रामति)

(जाहाङ्गीरस्त्वरितं चम्पकवदनं समावल्य गुप्तचरस्य हस्तात् पिस्तलं निष्काशयति) (उभौ युध्येते)।

गुप्तचरः। धिक् धिक् धिक्। इस्लामधर्मावलम्बी भूत्वापि त्वं हिन्दुस्थान-पक्षतो योद्धुं न लज्जसे ? धिक्, धिक्, धिक् ! विश्वासघातक ! विधर्मिन् नरककीट !

जाहाङ्गीरः। नेदं हिन्दुस्थानम्। इदं भारतवर्षम्—हिन्दु-मुसलमान-बौद्ध-ख्रीष्टान-जैन-शिख-पारसिक-प्रमुखाणां सर्वधर्मावलम्बिनां साधारण-वास-स्थानम्। अत्रास्ति सर्वेषां समानाधिकारो जाति-धर्म-वर्णनिर्विशेषेण।

(युध्यमानो गुप्तचरो निहतः)

चम्पकवदनः। (साश्रुनेत्रः) प्राणप्रतिम भ्रातः जाहाङ्गीर ! त्वं हि मम प्राणदाता। स्वीय-जीवनमपि विपन्नं कृत्वा त्वं मम जीवनं रक्षितवान्। तव स्नेहोऽतुलनीयः।

जाहाङ्गीरः। न न, तव प्राणरक्षा तु "आल्ला" कृपया जाता। क्षुद्रातिक्षुद्रोऽहम् निमित्तमात्रम्। जीवनधन भ्रातः ! तव मरणं ममापि मरणं सुनिश्चितमेव।

चम्पकवदनः। अपारा खलु तव ममता। मामालिङ्ग प्राणप्रिय।

(उभौ आलिङ्गतः)

चम्पकवदनः। अहो माहात्म्यं बन्धुत्वस्य !

नृपः सार्वभौमो धनैश्वर्य-शौर्य-
प्रचण्डोऽपि हीनो भवेद् बन्धुना चेत्।
स भिक्षोरपि स्यान्नितान्तं दरिद्रो
न बन्धुत्वतुल्या भुवि श्रेष्ठ-सम्पत् ॥६६॥
आत्मानमेषा कुरुते सुतृप्तं
प्राणांश्च पूर्णान् विमलं मनश्च।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एको हि पन्थाः कुसुमास्तृतोऽयं
दुर्लङ्घ्य-संसार-दुराटवीतले ॥६७॥

जाहाङ्गीरः। जीवनधन मम! अपूर्वा खलु तव भावना, अपूर्वतरा च प्रकाशभङ्गिमा।

चम्पकवदनः। (अशृण्वन्)—शृणु, शृणु, द्वितीय-जीवन मम, शृणु मम मर्मोत्थां वाणीं सावधानम् पुनः—

संसार-सिन्धौ तरणी दृढ़ेयम्
आरामभूता मरुसंसृतौ सा।
संसार-काराभवनेऽन्धकारे
चिरोज्ज्वलः सैव हि दीप एकः ॥६८॥

जाहाङ्गीरः। धन्यातिधन्यो जातोऽहं तव स्नेहप्रीतिलाभेन। नेदृशो लाभो मम पुण्यकर्मजन्यः—परन्तु तव सर्वेषाञ्च आशीर्जातः।

(ततः प्रविशति धावन् अभ्रप्रतिमः)

अभ्रः। चम्पक चम्पक! अहम् अभ्रप्रतिमः अत्रागत आकाशयानेन। किं त्वं मां विस्मृतवान्?

चम्पकः। (आनन्दोत्फुल्लः) अभ्र अभ्र! प्राणप्रतिम सखे! सत्यं त्वमत्रागतः? अविश्वास्यमेतत्। "स्वप्नो नु माया नु मतिभ्रमो नु"। न मे आशासीत् तव पुनर्दर्शनाय। अहो आनन्दाधिक्येनाहमुन्मत्तो जातः।

अभ्रः। अहमपि प्राणाधिक! (सर्वे हसन्ति)

चम्पकः। अभ्र! अयं मम प्रियतमो भ्राता जाहाङ्गीरः, सुप्रसिद्ध-सैनिकः। जाहाङ्गीर! अयं मम प्राणसमो बाल्यबन्धुः अभ्रप्रतिमः, सुप्रसिद्ध आकाशयान-चालकः।

जाहाङ्गीरः। नमस्कारः। किन्तु नाहं सुप्रसिद्धः।

अभ्रः। नमस्कारः। अहमपि न सुप्रसिद्धः। (सर्वे हसन्ति)

चम्पकः। (सोपहासम) अहो! अतीव विनीत-स्वभावौ द्वौ! यातु

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तत्। प्राणप्रियौ! परेद्युर्वयं दुर्गम-गिरिवर्त्मान्यतिक्रम्य नवस्थानमधिकर्तुं गमिष्यामः। ततोऽधुना शिविरे प्रत्यावर्तनमेव वरम्।

उभौ। यत् त्वमिच्छसि।

(सर्वे कण्ठे कण्ठे धृत्वा वहिर्गता गायन्तः)

[जोयानवृन्दस्य युद्धयात्रासङ्गीतम्]

चलामश्चलामो भारत-तनया
देश-मातृशरणाः।
न्याय-युद्धरता ब्रह्मपादनताः
शत्रुदर्पहरणाः ॥६९॥

मङ्गल-निर्झरिणी भारत-जननी
धरणीशिरोमणिः।
वीरप्रसविनी धीर-सञ्चारिणी
स्थिर-लक्ष्यसाधिनी ॥७०॥

विजय-विशोभिता विराम-विरहिता
विपुल-बलधारिणी।
नित्य-प्रदीपिता वित्त-प्रमोदिता
चित्त-तम-हारिणी ॥७१॥

चलामश्चलामो भारत-तनया
जननी-स्नेहधनाः।
निर्दोषप्राणा निर्भीक-रणा
विहित-जीवन-पणाः ॥७२॥

समाप्तम् अष्टम-दृश्यम्

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नवम-दृश्यम्

[चम्पकवदनस्य अपूर्वा साहसिकता]

स्थानम्—युद्धक्षेत्रम्।

समयः—सन्ध्या।

(ततः प्रविशन्ति वीर-"जोयान्" वृन्दम्, चम्पकवदनः जाहाङ्गीरः, अन्ये च दृढ़-सङ्कल्पा निर्भीक-हृदयाः)

देशजननी-वन्दना

समवेत-सङ्गीतम्

सुन्दरी मम देशजननी हिमाचल-प्रियकन्या।
धरणिभरणी विश्वशरणी पुण्यपीयूषपण्या ॥७३॥
वेदझङ्कृत-काननयुता ऋषिपादरजोधन्या।
जाह्नवीजलनियतपूता तरुणतापसिम्मन्या ॥७४॥
विलसति मम देशजननी त्रिभुवनाग्रगण्या।
कलुषहरणी मोक्षतरणी धरातलसदानन्या ॥७५॥
मञ्जुम-धुपगुञ्जनस्तुता परदेवाशीर्जन्या।
सर्वजनमहागतिभूता वीरसन्तानवन्या ॥७६॥

चम्पकवदनः। प्रिय भ्रातः जाहाङ्गीर! पश्य, अदूरस्थ-शत्रुपरिपूर्णं स्थानम्। तदेव मम लक्ष्यम्। शत्रून् पराजित्य तस्मिन्नेव स्थाने पवित्रां त्रिवर्ण-रञ्जितां भारतीय-जातीय-पताकामहम् उत्तोलयितुमिच्छामि सगौरवम्। ततो गच्छामि। प्राणसख! त्वमत्रैव तिष्ठ, स्थानमिदं रक्षितुम्।

जाहाङ्गीरः। (सोद्वेगम्) जीवनसम भ्रातृवर! शृणु मद्वचनम्। शत्रवः संख्याधिक्येन अस्त्र-शस्त्र-प्राचुर्येण च साम्प्रतम् अस्मान् अनायासेन पराजेतुं समर्थाः। ततो विपत्सम्मुखीनता न वाञ्छनीया। अतएव प्रिय भ्रातः, अपेक्षस्व परेद्युः प्रभात-पर्यन्तम्। अत्रान्तरेऽस्माकं नव-सैन्यदलानि अस्त्र-शस्त्रैः सहागमिष्यन्ति सुनिश्चितमेव।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चम्पकवदनः। नहि नहि। अद्यैव सूर्यास्तगमनस्य प्रागेव अस्माकं परमादरणीया भारतीय-पताका शत्रुव्यूहे उत्तोलनीया।

जाहाङ्गीरः। (पूर्ववत् सोद्वेगम्) कथं कथं प्रिय भ्रातः? प्रभात-पर्यन्तम् अपेक्षसे चेत् का क्षतिः? नानर्थकं तव सुन्दर-तरुण-जीवनं विपन्नं कुरु।

चम्पकवदनः। (सावेगम्) प्राणप्रिय भ्रातः! अद्यैव तत् करणीयम् अस्मिन्नेव क्षणे। शृणु? अद्य मम जन्मदिवसः। अस्मिन् विशेषदिने अहं वाञ्छामि देश-जनन्यै मम कञ्चन क्षुद्रोपहारं दातुम्। प्राणप्रिय भ्रातः! अकस्मान्मनो मे गतं सहस्र-योजनानि अतिक्रम्य मम ग्राम-कुटीरे।

अस्माकं चिराचरित-रीत्यनुसारेण मम प्राणप्रिया जननी मम जन्मदिवसे स्वहस्तकृतम् उपहारमेकं मह्यं ददाति। अहमपि स्वहस्त-कृतम् उपहारमेकं जनन्याः श्रीपादपद्मे अर्घ्यरूपेण ददामि। वर्तमान-वत्सरे सा नास्त्यत्र, अस्ति तु तदभिन्ना देशमाता। सा हि मह्यमद्य सूर्यस्य सुवर्णालोकम्, मलयस्य शीतलं स्पर्शम्, गगनस्य निर्मल-नीलिमानम्, वीर-"जोयान"भ्रातृ-वर्गस्य कोमल-स्नेहञ्च उपहार-स्वरूपेण दत्तवती सानुग्रहम्। ततोऽहमपि तस्यै स्वहस्तकृतम् उपहारमेकम् अवश्यं दास्यामि।

प्रिय भ्रातः! मा चिन्ताकुलो भव। अहं यामि देशजनन्या गौरव-पताकां स्थापयितुं सानन्दम्। सत्वरं प्रत्यावर्तिष्ये।

जयो विश्वललामभूत-भारतजनन्या जयः; जयो विपुल-वीर्य-विमण्डित-"जोयान"भ्रातृवृन्दस्य जयः; जयः करुणा-वरुणालय-जगन्मातुर्जयः।

जय हिन्द्, जय हिन्द्, जय हिन्द्,। वन्दे मातरम्।

("जोयान"-वृन्दस्य युद्धयात्रासंगीतम् उच्चैर्गायन् वेगेन निष्क्रान्तः)

जाहाङ्गीरः। किं करोमि, किं करोमि मन्दभाग्योऽहम्। खोदाताला मम प्राणप्रिय-भ्रातृवरं रक्षतु कृपया।

(अदूरे घोरो रणकोलाहलः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जाहाङ्गीरः। अहो दारुणो दुर्विपाकः। असहायोऽहम्। मम स्थान-परित्यागोऽपि न सम्भवति। यत्नः स्थानमिदं मयैव रक्षणीयम्। अहो दौर्भाग्यम्।

(अदूरे घोरो रणकोलाहलः)

चम्पकवदनः। (नेपथ्ये सानन्दम् उच्चैः) भारत-जनन्या दीनातिदीनः सन्तानोऽहं स्थानेऽस्मिन् भारत-भूमेर्विश्ववन्दितां विश्वप्रीति-विश्वमैत्री-विश्वशान्ति-प्रतीकभूतां त्रिवर्णरञ्जितां पताकाम् उत्तोलयामि।

जयो विश्वललामभूत-भारत-जनन्या जयः, जयो विपुल-वीर्यविमण्डित-"जोयान"-भ्रातृवृन्दस्य जयः, जयः करुणा-वरुणालय-जगन्मातुर्जयः। जय हिन्द्, जय हिन्द्, जय हिन्द्। वन्दे भातरम्।

("जोयान"-वृन्दस्य युद्धयात्रासंगीतम्)

जाहाङ्गीरः। (सानन्दम्) अहो सफलकामो मम प्राणप्रतिमो भ्रातृवरः। परम-कृपामयः परमेश्वरः। (उच्चैः, जयो विश्वललामभूत-भारतजनन्या जयः—इत्यादि पठति)।

(पुनर्घोरो रणकोलाहलः)

नेपथ्ये चम्पकवदनः। (आर्तस्वरम्) भ्रातः भ्रातः, प्राणप्रतिम भ्रातः!

जाहाङ्गीरः। (सोद्वेगम्) हा हतोऽस्मि! किं संघटितम्? कुत्र मम प्रियो भ्राता चम्पकवदनः? कोऽयं सर्वनाशः समुत्पन्नः? हा हा हा!

प्रचण्ड-मध्याह्नमरीचिमाली
ग्रस्तोऽभवन्निर्मम-राहुणा किम्?
कूलङ्कषा वेगवती स्रवन्ती
किं प्रस्तरस्तूपनिवृत्तवेगा? ॥७७॥
कुञ्जे वसन्तागम-पुष्पकान्ते
कूजन्नजस्रं मधु मुक्तकण्ठम्।
पिकः शिलीभूत-हिमैरकाण्डे
किमाहतोऽजायत रुद्धकण्ठः ॥७८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सहस्रपत्रं विकचं किमब्जं
प्रकम्पितं वेगवताऽनिलेन ?
अहो महानेष विपन्निपातो
महच्च दुर्भाग्यविजृम्भणं नः ॥७९॥

(अन्धकारः)

पटपरिवर्तनम्

[चम्पकवदनस्य अमरत्वलाभः]

स्थानम्—भारतीय-"जोयान"वृन्दस्य शिविरान्तर्गतश्चिकित्सालयः।
समयः—सूर्यास्तम्।

(ततः प्रविशन्ति मरणापन्नः सहास्याननश्चम्पकवदनः, क्रन्दनातुरो जाहाङ्गीरः, क्रन्दनातुरोऽभ्रप्रतिमः, क्रन्दनातुरा शुश्रूषाकारिणी पङ्कजनयना, सेनाध्यक्षः "जोयान"-वृन्दश्च)

चम्पकवदनः—

रवेरिवास्तोदय-वर्जितस्य
प्रभा स्थिरा भारतमातुरास्ताम्।
अब्धेरिवापीन-कृशस्य शश्व-
न्नित्योच्छलं स्याद्दमृतञ्च तस्याः ॥८०॥
सरोरुहस्येव विकस्वरस्य
स्यात् सौरभं नित्यविसारि तस्याः।
सौन्दर्यमैश्वर्यमथैतदीयं
ह्रासोदयाभ्यां रहितं सदा स्यात् ॥८१॥

चम्पकवदनः। (गवाक्ष-रन्ध्रेण वहिर्दत्तदृष्टिः) अहो अस्तं गच्छति भगवान् भास्करः। अस्तं गच्छति मम जीवन-सूर्योऽपि। परन्तु कदापि नास्तं गमिष्यति भारतमातुर्महागौरवच्छविः; कदापि नास्तं गमिष्यति भारतसन्तानानां महाप्रतापदुरतिः; कदापि नास्तं गमिष्यति जगन्मातुर्मङ्गल-विम्बश्च। कदापि न, कदापि न, कदापि न।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जाहाङ्गीरः। (क्रन्दनातुरः) प्राणाधिक भ्रातृवर! तव देशभक्तिस्तव स्वार्थत्यागस्तव शौर्यञ्च शाश्वतकालम् अस्माकं महादर्शरूपेण विराजिष्यन्ते सुनिश्चितम्।

सेनाध्यक्षः। वत्स चम्पकवदन! तव कर्मकुशलता, निर्भीकता, निःस्वार्थ-परता जननीसेवा च सर्वेषामनुकरणीयाः। तदर्थमहं त्वां वीर-पदक-विभूषितम् उच्चतर-पदाभिषिक्तञ्च करोमि।

चम्पकवदनः। माननीय सेनाध्यक्षमहोदय! असीमा खलु भवतः कृपा। धन्योऽस्मि—यद्यपि ममायुष्कालोऽत्यल्पमात्रः।

सेनाध्यक्षः। वत्स! कल्याणं ते भूयात्।

"जोयान"-वृन्दम्। जयो भारत-भास्कर-श्रीचम्पकवदनस्य जयः; जयो देश-दीप-श्रीचम्पकवदनस्य जयः; जयो विश्वमधु-श्रीचम्पकवदनस्य जयः।

चम्पकवदनः। (भगिनीमभ्रप्रतिमञ्चोद्दिश्य) प्रियतमे भगिनि? प्राण-प्रिय सखे! आगच्छतं मत्समीपे, मार्जयतम् अश्रूणि, इयं मम जययात्रा न मरणम्।

अभ्रप्रतिमः। अभिन्न-हृदय सखे! तव मरणं नास्ति, अमरस्त्वं जातः, अमृत-पथानुगामी ब्रह्मलोकाधिकारी च।

पङ्कजनयना। जीवन-सर्वस्व भ्रातृवर! अकस्मादहम् अत्रागता "जोयान"-सेवकारूपेण। तव दर्शनलाभ एव मम महासौभाग्यम्। तव महागौरवेण गौरवान्वितः समग्रो देशः।

चम्पकवदनः। ममतामयि भगिनि! गौरवं न मम; गौरवं गृहजनन्याः, गौरवं देश-जनन्याः, गौरवं जगज्जनन्याः। तद्गौरव-भास्कर-रश्मि-लेशेन प्रस्फुटितोऽहं दीनहीनश्चम्पकः। यद्यपि मम दलानि शुष्यन्ति मधूनि लीयन्ते सुरभयश्चापगच्छन्ति तथापि मम किम्? क्षुद्रं जीवनं क्षुद्रमेव राजतु, तेनापि मम किम्?

पङ्कजनयना। महिममय भ्रातृवर! न त्वं क्षुद्रः, त्वं भूमा महान्। त्वं ब्रह्मानन्द-ब्रह्मालोक-ब्रह्मामृतधन्यः। तव दलानि कदापि न शुष्काणि भविष्यन्ति; तव मधूनि कदापि न विलीनानि भविष्यन्ति; तव सुरभयोऽपि कदापि न क्षीणा भविष्यन्ति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न पार्थिवो जात्वसि चम्पकस्त्वं
त्वं पारिजातः सुरलोकजातः।
देशस्य चेतःसरसि प्ररूढ-
पयोजवत्तिष्ठ चिरप्रकाशः ॥८२॥

किन्तु हृदयालोक भ्रातृवर! किमहम् अस्माकं जनन्यै कथयिष्यामि?

चम्पकवदनः। (सचकितः) जनन्यै? जनन्यै? किमहं तस्यै कथयिष्यामि? भवतु।

शृणु शृणु, अयि सुधास्वरूपिणि भगिनि! मद्वचनेन कथय तां केवल-मेतदेव—

"तव प्राणप्रदीपः पुत्रस्तवादेशेन "देशदीपो" भवितुं यत्नवान् आसीत् आजीवनम्। श्रीश्रीदेश-देव्याः पवित्र-पूजावेदीतले क्षुद्रातिक्षुद्रः क्षीणातिक्षीणः मृत्प्रदीप इव स प्रज्वलित आसीदाजीवनम्। तस्य म्लाना रश्मयो देशमुद्-भासयितुं न समर्था इति सत्यम्, तथापि इदमपि सत्यं यत् तस्य दीपस्य क्षीण-शिखा विश्वजनन्याः श्रीचरणारविन्दं स्प्रष्टुं समर्था पूर्णतया।"

पङ्कजनयना। (साश्रुनेत्रा) कथयिष्यामि इदं ताम् अमरकीर्ति-भ्रातृवर! कथयिष्यामि इदं तां सुनिश्चितमेव।

भारतजननीवन्दना

भारतभूतल-मुच्चतपःफल-लब्धजनन-जन-कान्तं
साममुखरवन-रञ्जितजनमन ईप्सितमखिलेऽभ्रान्तम्।
धर्मपरायण-कर्मनिरतजन-राजितसर्वनिशान्तं
दीर्घर्ज्वपघन-दीप्ततपोधन-क्लिप्त-कुटिर-घटितान्तम् ॥८३॥
होमधूमजनि-सान्द्रमलिनिमनि विटपिनि विहृतशकुन्तं
चतुरर्णवजल-पूतचरणतल-विलुठितकोटिशिरोऽन्तम्।
नमामि जननीं भारतधरणीं परकृतशोषण-तान्तां
तनयदुर्दशाऽपनय-परवशामसुखां सतताशान्ताम् ॥८४॥

[समाप्तं नवम-दृश्यम्]

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दशम-दृश्यम् (अन्तिम-दृश्यम्)

[देशदीपश्चम्पकवदनः]

स्थानम्—पल्लीभवनम् ।

समयः—प्रभातम् ।

(ततः प्रविशतो ब्रह्मबलः आराधना च)

ब्रह्मबलः । देवि ! बहुकालं यावत् आवां पुत्र-कन्ययोर्वार्तां न प्राप्तवन्तौ ; न जाने किं संघटितम् । तथापि त्वम् आनन्दोत्फुल्ला राजसे, कथम् ?

आराधना । आर्य ! मनो मे कथयति यत् परमानन्द-वार्तामहं प्राप्स्यामि अद्यैव, सुनिश्चितमेव ।

विकशति नवजाग्रद् भानवीयांशुयोगात्
कलिरिव कमलानामात्म-पद्मं ममापि ।
तृणमिव नववर्षावारिधाराभिषिक्तं
भजति सरसभावं हन्त मे प्राणवृत्तिः ।
प्रथम-जलददामालोकहृष्टः शिखीव
प्रमदभरपरीतं नृत्यतीदं मनो मे ॥८५॥
बहति ननु ममाद्य प्राण-चित्तात्मसु द्राक्
प्रमद-सलिलपूरो जृम्भते चामृतोर्मिः ।
प्रचलति रयतीव्रं स्रोत आलोकरूपं
मम हि मलिन-भाग्यं जातमद्य प्रसन्नम् ॥८६॥

ब्रह्मबलः । (आश्चर्यान्वितः) कल्याणि ! कथं तवायं विश्वासः ?

आराधना । (सस्मितम्) नाथ शृणु ! पश्य पश्य ! अतिमनोहरः प्रभातकालः समागतः । निर्मल-नील-गगने हसति भगवान् दिनमणिः प्रसन्न-प्रभया ; वहति शीतलः पवनः सरस-स्नेहेन ; नृत्यति मञ्जुला तटिनी ललित-लीलया ; गुञ्जन्ति चञ्चला भ्रमरा अमृतानन्देन ; गायन्ति वासन्त-विहगाः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

किन्नरकण्ठेन। अहो! सर्वत्र विराजन्ते शाश्वती शान्तिः, महती मैत्री, पुण्यवती प्रीतिश्च सगौरवम्।

देव! मानव-मनः प्रकृत्यनुसारि सर्वथा। पश्य नाथ! प्रमुदिता प्रकृतिर्लसति सर्वत्र। ततो गम मनोऽपि प्रमुदितं समानम्।

ब्रह्मबलः। प्रज्ञा-पवित्रे! अपूर्वा खलु तव वाणी!

(ततः प्रविशतो नत-मस्तकौ अभ्रप्रतिमः पङ्कजनयना च)

ब्रह्मबलः। (परमोत्फुल्लः) देवि! सत्यो जातस्तव विश्वासः। आगतौ अकस्मादावयोः प्राणप्रिय-जनौ।

अभ्रप्रतिमः पङ्कजनयना च। मातापितरौ! प्रणमामि।

ब्रह्मबलः। कल्याणं युवयोर्भूयात्। अकस्मात् कुतो युवामागतौ?

उभौ। (तूष्णीं तिष्ठतो नत-मस्तकौ)।

ब्रह्मबलः। (सोद्वेगम्) किं सङ्घटितम्? कुत्र मम प्राण-प्रतिमः पुत्रश्चम्पकवदनः?

उभौ। (पूर्ववत् तिष्ठतः)।

ब्रह्मबलः। (सोद्वेगम्) कथयतं कथयतं त्वरितम्, कुत्र सः?

पङ्कजनयना। (नत-मस्तका रुद्धस्वरा) स नास्ति।

ब्रह्मबलः। (व्याकुलः) नास्ति? कथम् एतत्?

आराधना। (शून्य-दृष्टिः क्षणं निष्प्राणेव स्थित्वा शान्तमूर्तिः) सोऽस्ति। पङ्कजनयने! न मृषा वद, न वृथा प्रलप, नान्यान् व्याकुलीकुरु अकारणम्। अहं वदामि, अहमुच्चैरुद्घोषयामि वारं वारम्—सोऽस्ति, सोऽस्ति, सोऽस्ति सुनिश्चितम् एव।

ब्रह्मबलः। (साश्रुनेत्रः) आर्ये! किं भणसि त्वम्? कुत्र सोऽस्ति? कुत्र, कुत्र, कुत्र? कथय, कथय, कथय, तत्।

आराधना। (पूर्ववत् शान्ता) सोऽस्ति श्रीदेश-मातृका-पूजा-वेदीतले शाश्वत-दीपरूपेण। तस्य दिव्य-दीप्तिः कदापि न म्लाना भविष्यति,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कदापि न, कदापि न, कदापि न। शाश्वत-देशदीपो जातो मम प्राणधन-पुत्रकः।

पङ्कजनयना। (रोरुद्यमाना) सैव तस्य शेषवाणी—स्नेहमयि मातः!

आराधना। जानामि तत्, प्रिय-कन्यके! जानामि तत्।

देव! न शोकाकुलो भव। आवयोः प्राणाधिक-पुत्रकस्य मरणं नास्ति। देशवासिनां शुभ-श्रद्धायां, देशवासिनां पूत-प्रीतौ, देशवासिनां स्थिर-स्मृतौ सः अमरो भूत्वा राजिष्यति शाश्वत-कालम्।

ब्रह्मबलः। (अश्रूणि संवृत्य) सत्यं पूर्ण-सत्यमेतत्—देवि जननी-कृपाधन्ये!

देश-जनन्या गौरवरक्षार्थम् उत्सर्गीकृत-प्राणानां सेवकानां मरणं नास्ति। ते तु मृत्युजयिनः कालजयिनो विश्वजयिनः।

अहो! अशेष-सौभाग्यमावयोः! यदावयोर्जीवनसर्वस्व-पुत्रको नित्यप्रदीप्तो "देशदीपो" जातः।

देशाम्बिका-सुमहदर्चन-वेदिकायां
निर्वास्यति क्वचिदयं ज्वलितो न दीपः।
शुष्कं भविष्यति विकाशि न पुष्पमेतद्
धूपोत्थ-धूमपटलं न कदापि लीनम् ॥८७॥
मानं रक्षन् देशमातुर्विसृष्ट-
प्राणो यः स्याद् देश-सेवाप्रवीणः।
तस्यैवं स्याज्जीवनं शेषहीनं
नित्याजेयं भीतिमुक्तं महच्च ॥८८॥

पङ्कजनयना। (अश्रूणि संवृत्य) परम-स्नेहसुशीतल पितः! परम-करुणा-कोमले मातः! किमन्यद् युवयोः प्रियं कर्तुं पारयामि?

ब्रह्मबलः। इतोऽपि प्रियं स्यात्? तथापीत्थमस्तु—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(भरतवाक्यम्)

धरणी-भरणी भारत-जननी
जयतु विजय-विलासिनी ।
मानस-हरणी मिलन-रागिणी
ध्वनतु विधुर-विनाशिनी ॥८९॥
कोमल-कान्तिः शोभन-शान्ति-
र्लसतु विश्व-विनोदिनी ।
सुधा-स्यन्दिनी शुभ-प्रस्रविणी
वहतु निःस्व-विशोभिनी ॥९०॥

ओं शान्तिः, ओं शान्तिः, ओं शान्तिः ।

[समाप्तं दशम-दृश्यम्]

—०—

[समाप्तं चेदं "देश-दीप"-नाटकम्]

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Sanskrit Dramas by Dr, Jatindra Bimal Chaudhuri

Sesies No. 1 Panca-Matrika-Lila Series

1. Dhriti-Sitam. On Sri Sri Sita.
2. Ananda-Radham. On Sri Sri Radha Rs. 8/-
3. Niskincana-Yasodharam on Yosodhara Gopa, Holy Consort of Lord Buddha. Rexin Bound Rs. 8. Pa per Cover Rs. 10/- only.
4. Priti- Visnupriyam. On the early life of Sri Visnupriya, Holy Consort of Sri Krisnacaitanya Mahaprabhu. Rs 8. only
5. Bhakti-Visnupriyam on the holy life of Sri Visnupriya, the Holy Consort of Sri Krisnacaitanya Mahaparabhu, from Mahaprabhu's Renunciation to the end of Sri Visnupriya's life. Rs. 8. only.
6. Amara-Miram On Sri Mira Bai. Rs 6/-
7. Bharata-Laksmi. On Rani Laksmi of Jhansi. Rs 8/-
8. Sakti-Saradam. On Sri Saradamani Devi, Holy Consort of Sri Ramakrisna Paramahamsadeva. From her nineteenth year to 1886 A. D. Rexin Rs. 10/. only ; Paper CoverRs. 8/. only.
9. Mukti-Saradam. On Sri Saradamani Devi, Holy Consort of Sri Ramakrisna Paramahamsadeva. From 1887—1920 A. D. Rs. 8.

Series No. 2 on Mother India.

10. Mahimamaya-Bharatam. On the Irrigation Policy of India throughout the Ages. Rs 6/-
11. Melana-tirtha-Bharatam. India's Contribution to Universal Brotherhood throughout the Ages deliniating episodes from the lives of Vedic Sage Atharvan, Sage Agastya, Emperor Asoka, Guru Nanak, Sri Ramakrisna Paramahamsadeva. Ravindranatha, and Mahatma Gandhi. Paper Cover Rs. 6/- Rexin : Rs. 8/-

Series No. 3 on Indian Leaders of Thought and Action.

12. Bharata-Hridaya-Aravindam On Sri Aurobindo. Paper Cover 8/-
13. Bhaskarodayam. On the early life of Ravindra Nath (up to his twenty-fifth year). With Principal Dr. Roma Chaudhuri's English Translation. Rexin Bound Rs. 16/-. Sanskrit Text and Translation: Separately bound Rs. 8/- and Rs. 10/-
14. Bharata-Bhaskaram on Ravindranath (from his 26th to 50th year).

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

15. Bhuvana-Bhaskaram on Ravindra Nath (from his 51st year to the end of his life).

16. Bharata-Janakam on Mahatma Gandhi. Rs. 6/-; Rexin Bound Rs. 8/-.

17. Desabandhu-Desapriyam-on Desabandhu Chittaranjan and Desapriya Jatindra Mohan. Rs. 6,

18. Subhasa-Subhasam-on Netaji Subhas Chandra Bose. Rs. 6,

19. Raksaka-Sri Goraksam—on Sri Goraksanath. Rs. 8,

Series No. 4. On Vaisnava Saints :

20. Vimala-Yatindram on Vedantacarya Sri Ramanuja. Rs. 8/- ; Rexin Rs. 10/-

21. Mahaprabhu-Haridasam on Bhakta-Yavan Haridasa, one of the foremost disciples of Sri Krisnacaitanya Mahaprabhu Rs 8/- ; Rexin Rs. 10/-

22. Dina-Dasa-Raghunatham. On Sri Raghunath Dasa Gosvamin Prabhu, one of the Six Vrindavana Gosvamins. Paper Cover Rs. 8/- ; Rexin Rs. 10/-.

Series no. 5. Adaptations from Foreign Dramas

23. Venice-Vanijam-(from Shakespeare's Merchant of Venice). Rs. 6

24. Othello (from Shakespeare's "Othello"). Rs. 6

Pali-Drama.

The only Pali Drama ever written.

25. The Bimbasundari-Patibimbanam on Sri Yasodhara, Holy Consort of Prince Siddhartha, depicting the entire life of Sri Sri Yasodhara.

Other Works of Dr. J. B. Chaudhuri

I. Contributions of Women to Sanskrit Literature in seven big volumes. 95.00

2. Contributions of Muslims to Sanskrit Learning :

Vol. I. Sangita-Malika by Md. Shah 10.00

Vol. II. Khan Khanan Abdur Rahim and Contemporary Sanskrit Learning. (Paper Rs. 6) Rexin. 8.00

Vol. III: Samudra Sangama by Md. Dara Sukoh 20.00

3. (a) Muslim Patronage to Sanskrit Learning : (Belles-Letters) 2nd Ed. 12.00

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(b) Muslim Patronage to Astrology and Astronomy (Jatakodaharana-Paddhati) 16,00

(c) Biography. Rudrakavi on his Muslim Patrons. 6.00

4. Sanskrita Duta-Kavya Samgraha in seven volumes with two original Sanskrit commentaries by Dr. J. B. Chaudhuri on the Ghatakharpara Kavya and the Padankaduta called Sasvati aud Bhasvati respectively 30.00

5. Sanskrit Poets of Mediaeval India Based upon Anthologies. (5 Volumes) 35.00

6. (a) Meghaduta with commentaries of Bharata Malika and others 20.00

(b) Meghaduta with commentaries of Sasvata and Sanatan Gosvamin 20.00

7. Vangiya Duta-Kavyetihasa (in Sanskrita). 8.00

8. Contributions of Bengal to Smriti Literature Vols. 1-3 (3rd vol. in Press) 14.00

9. Historical Kavyas in Sanskrit, 4 Vols. 39.00

10. Poetical Works, etc.

A. Original Composition in Sanskrit

(a) Sakti-Sadhanam. 4.00

(b) Several commentaries on Sanskrit Texts. See Detailed Catalogue 5.00

(c) Sanskrit and Bengali Songs of Dr. Jatindra Bimal Chaudhuri, with Bengali Translation by Principal Dr. Roma Chaudhuri, Principal, Lady Brabourne College—in Seven Parts. 15.00

B. Works on Hindu Dharma with Bengali Translation

(a) Bhagavad Gita (Rexin) 6.00

(b) Sri Sri Candi 6.00

11. Bengali Works

(a) Pt. Iswar Chandra Vidyasagar 4.00

(b) Gaudiya Vaisnavder Sanskrit Sahitye Dan 4.00

(c) Prabandhavali in Eight Vols (Rs. 5 each) 40.00

(d) Buddha-Yasodhara— (Paper Rs. 5.) Rexin, Rs 7. 5.00

(e) Janani Yasodhara 8.00

12. The Position of Women in the Vedic Ritual 15.00

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

13. Miscellaneous

(a) Sanskrit and Prakrit Books in the India Office Library by Dr. J. B. Chaudhuri (as Joint Author) in four big volumes 250.00

Pracyavani, 12 Volumes ; each volume Rs. 12 144.00

(c) Gaura-tattvam 8.00

(d) Nripati-niti-garbhita-vritta 20.00

WORKS OF Dr. ROMA CHAUDHURI

(Principal, Lady Brabourne College, Calcutta, Govt. of W. Bengal)

English

1. **Doctrines of Nimbarka and His Followers** (Vaisnava-Vedanta)—In 3 Volumes. Published by Asiatic Society of Bengal. Rs. 18·00
2. **Sufism and Vedanta.** In 3 Volumes. 2 Volumes Published (2nd Edition, 3rd vol. in the Press.) Rs. 18·00
3. **An Indo-Islamic Synthetic Philosophy** (Comparative Survey of India and Islamic Views, viz. of the Upanisads, Vedanta Systems, Holy Quran and Sufi Systems) Rs· 20·00
4. **Doctrines of Srikantha** (Saiva Vedanta). In 3 Volumes. 2 Volumes published. 3rd Vol. in the Press. Rs. 52-00
5. **Sanskrit and Prakrit Poetesses.** Rs. 15·00
6. **Philosophical Essays** (Collection of Articles in English and Bengali). In the Press.

Bengali

1. **Nimbarka Darsan** Rs. 8·00
2. **Sufi Darsan O Vedanta** Rs. 8·00
3. **Sanskrita O Prakrita Nari Kaviganer Kavitavali.** Published by Visva Bharati. Rs. 2.50
4. **Vedanta Darsan** (3rd Ed) Published by Visva Bharati.
5. **Dasa Vedanta Sampradaya O Vanga-Desa.** In 3 Volumes. First Vol. (on Sankara-Vedanta) Published. Rs. 30·00

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

6. **Sahitya-Kana** Rs. 3·00
7. **Sanskritanka Roga.** Rs. 3·00

Name of the Modern Sanskrit Dramas composed
By
(Dr. Roma Chaudhuri) **(Rs. 5/each)**

1. **Yatindra-Yatindram** (on the holy life of Dr. Jatindra Bimal Chaudhuri)
2. **Samkara-Samkaram** (on the holy life of Advaitacharya Sri Samkara)
3. **Desa-Dipam** (on a nationalistic theme, on the holy life Jawans)
4. **Palli-Kamalam** (on village Life of Bengal)
5. **Nagara-Nupuram** (on Town Life)
6. **Sansaramritam** (on Modern Life)
7. **Bharatacharyam** (on the holy life of our revered Rastrapati Dr. S. Radhakrishnan)
8. **Abhedanandam** (on the holy life of Swami Abhedananda, on the auspicious occasion of his holy Birth-Centenary)
9. **Nivedita-Niveditam** (on the holy life of Sister Nivedita, on the auspicious occasion of her holy Birth-Centenary)
10. **Rama-Charita-Manasam** (on the holy life of Saint Tulsidas)
11. **Yuga-Jivanam** (on the holy life of Sri Ramakrishna Paramahamsa Deva)
12. **Rasamaya-Rasamani** (on the holy life of Rani Rasmani,)
13. **Prasanna-Prasadam** (on the holy life of renowned Kali-Sadhaka of Bengal, Ramaprasad)
14. **Kavi-Kula-Kokilam** (on the holy life of Mahakavi Kalidasa)
15. **Chaitanya-Chaitanyam** (on the holy life of Sri Gauranga)
16. **Megha-Medura-Mediniyam** (on the prior and later unknown portions of the Megha-duta of Kalidasa)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

17. **Gana-Devata-Natakam** (on the life the of renowned writer Sri Tarashankar Banerji)

18. **Agnivina-Natakam** (on the life of Poet Kazi Najrul Islam)

19. **Kavi-kula-kamalam** (on the later life of Mahakavi Kalidasa)

20. **Desa-Janakam** (on the holy life of Mahatma Gandhi, on the auspicious occasion of his holy Birth-Centenary.)

21. **Lenina-Vijayam** (on the holy life of Lenin, on the auspicious occasion of his holy Birth-Centenary.)

22. **Bharata-Viram** (on the holy life of Sri Shivaji)

23. **Tana-Tanu** (on the holy life of Sri Tanasena)

(The above Sanskrit Dramas have been staged all over India and outside many times. **"Samkara-Samkaram"** was staged in Kathmandu, Nepal, under the auspices of Indian Embassy, in the benign presence of His Majesty, King Mahendra of Nepal and other members of the Royal Family.

"Bharatacaryam" was staged in Rastrapati Bhavan, New Delhi, in the benign presence of the revered Rastrapati Dr. Radhakrishnan, who donated Rs. 1500, to Pracya-vani as his blessings. By staging **"Kavi-Kula-Kokilam"**, Pracya-vani—for the first time for W. Bengal—won the coveted "Svarna-Kalasa" (Golden Pitcher) as First Prize in the All-India Kalidasa-Samaroha in Ujjain in November. 1967.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha